॥ श्रीरस्तु ॥

श्रीमत्

ब्रह्मसूत्रपदान्वयमञ्जरी

THE

BRAMHA SÛTRAS.

Construed literally according to the Commentary of

SRI MADHVACHARYA.

Compiled from the SUTRA BHASHYA, TATVA PRAKASIKA, TANTRA DIPIKA &c.

BY

P. RAMACHANDRA ROW B.A.,
Retired Statutory Civilian.

Printed at the "SRI VIDYA PRESS"
KUMBAKONAM.
1902.

॥ श्रीरस्तु ॥

श्रीमत्

॥ ब्रह्मसूत्रपदान्वयमञ्जरी ॥

THE

BRAMHA SÛTRAS.

Construed literally according to the Commentary of
SRI MADHVACHARYA.

Compiled from the SUTRA BHASHYA, TATVA PRAKASIKA, TANTRA DIPIKA &c.

BY

P. RAMACHANDRA ROW B. L.,
Retired Statutory Civilian.

Printed at the "SRI VIDYA PRESS"
KUMBAKONAM.
1902.

PREFACE.

This is not an original work, and is a new book only in appearance. The construction, (anvaya) ellipse supplied, (Adhyâhâra), and the explanations of the text of the Sutras, have all been selected from the *Sutra Bhashya*, *Tatvaprakasika*, *Tantra Dipika*, and *Sutra Dipika*.

The sole merit of this work is, that unlike most other printed or MS. Sanskrit works of the kind, in which one uniform kind of type or character is used for the text, the words supplied, the explanations given, and the authorities relied on; and in which punctuation is conspicuously absent, an attempt has here been made to shew each class of words separately, so that the reader may see, at a glance, what the original words are what they mean, what words are wanting to complete the sense, and what the authorities quoted are.

The compiler felt the want of such a work, when he undertook the study of the *Sutras*, and he flatters himself with the hope that it will prove useful to other students as well.

P. R.

विद्वदभ्यर्थना ।

श्रीमद्भिर्भगवत्पादाचार्यपुरस्सरैः विरचित सूत्रभाष्य तत्वप्रकाशिका तन्त्रदीपिकादिग्रन्थेषु सूचित सूत्रपदान्वया एव संगृह्याप्रोच्यन्ते ॥

सूत्रेषु अध्याहर्तव्यादिपदान् पूर्वोक्तग्रन्थेषु तत्र तत्र प्रदर्शयित्वा तैः सह सूत्रगतपदानां अन्वयपूर्वकं वाक्यरूपेण प्रायशः प्रदर्शितत्वेऽपि मन्दमतीनां दुरवगमात् केवलसूत्रगतवाक्यार्थानां सुबोधाय जिज्ञासुना मया ग्रन्थोऽयं कृतः ॥

अतिस्पष्टैः स्थूलसूक्ष्मैर्मनोहरैरायसाक्षरैरस्मिन् मुद्रितेसति अल्पबुद्धीनां । पाठपारायणादि कुर्वतां विदुषां च महानुपयोगः स्यादिति कृत्वा इदं मुद्रितम् ॥

ब्रह्ममीमांसाशास्त्रपठनफलं वराहपुराणोक्तं लिख्यते ॥

"मीमांसा द्विविधा प्रोक्ता कर्मणो ब्रह्मणस्तथा । वेदार्थज्ञानतुल्याद्या द्वितीयायाः फलं श्रुणु । प्रत्यक्षरंतु लभते गायत्री शतजं फलम्"॥

इत्यशेषमति मङ्गलम् ॥


शुभकृन्नाम संवत्सर
मार्गशीर्ष शुद्ध पञ्चमी }

पनमले रामचन्द्रराव्



॥ शुद्धाशुद्धपत्रिका ॥

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
२२	५	स्वदेहादेवापयोत्पादक	स्वदेहादेवापत्योत्पादक
,,	१०	समग्रस्यार्थवधारणार्थ	समग्रस्यार्थावधारणार्थ
२३	२	अधिकरणसंख्या (१)	परिहर्तव्या
,,	४	,, (२)	इति लेखनीयं
२४	२४	एक	लोके
३३	२२	स्वप्नवत्	स्वप्नादिवत्
४१	१६	"सोऽनादिरेवे"ति	"सोऽनादिने"ति
४४	४	"नाप्तावस्य"	"नासावस्य"
,,	२५	वरुणाद्यनुज्ञाया	वरुणाद्यनुज्ञया
४५	१८	दोषा वैचित्र्यं	दोषवैचित्र्यं
४७	१	पा—३	पा—४
४८	१	पा—३	पा—४
५२	९	स्वसिद्धन्तोऽपि	स्वसिद्धान्तोऽपि
५७	६	सर्वभूतेष्वेवमेवे	सर्वभूतेष्वेतमेवे
६०	४	अवर्तनात्	आवर्तनात्
६६	१७	नचानंदादय	नचानंदादयः
६८	२४	संसारसमत्वेन पुरुषार्थ	संसारसमत्वेनापुरुषार्थ
७१	९	सर्वकाल	सर्वकाला
७३	१३	इत्येतयोर्बलीयस्त्वात्	इत्येतेषां बलीयस्त्वात्
,,	६	(अविशेषेण । न एकरूपा न)	(अविशेषेण न । एकरूपा न)
७९	२२	न मोक्ष	नापरोक्ष
८२	२३	अतो	परिहर्तव्यं
८४	८	तूपाभावेभ्यः	तद्रूपाभावेभ्यः
८५	१६	शिष्यानां	शिष्याणां च
८६	३	यतित्वस्येव	यतित्वस्येव
,,	१९	न च देहांतरावसाने	नचेद्देहांतरावसाने
८७	३	"आत्मा तत्वमसी"	"स आत्मा तत्त्वमसी"



॥ हरिः ओं ॥

॥ श्री गुरुभ्यो नमः ॥

॥ ब्रह्मसूत्रपदान्वयाः ॥

नत्वा कृष्णं तथा मध्वं जयतीर्थादिसद्गुरून् ।
वक्ष्याम्यहं बुद्धिशुद्ध्यै ब्रह्मसूत्रपदान्वयान् ॥

१ ओं ओं अथातो ब्रह्मजिज्ञासा ओं । ॥ १ ॥

अथ अतः ओं ब्रह्मणः जिज्ञासा कर्तव्या ॥

२ ओं जन्माद्यस्य यतः ओं । ॥ २ ॥

अस्य जन्मादि यतः भवति तद्ब्रह्म ॥

३ ओं शास्त्रयोनित्वात् ओं । ॥ ३ ॥

नानुमानतो अन्ये रुद्रादयः जगत्कारणत्वेन कल्पनीयाः । कुतः ? तस्य जगत्कारणत्वस्य शास्त्रयोनित्वात् ॥

४ ओं तत्तुसमन्वयात् ओं । ॥ ४ ॥

तत् तु सम् शास्त्रयोनि समन्वयात् ॥

५ ओं ईक्षतेर्नाशब्दम् ओं । ॥ ५ ॥

तद्ब्रह्म अशब्दं न । कुतः ? ईक्षतेः ॥

ओं गौणश्चेन्नात्मशब्दात् ओं । ॥ ६ ॥

ईक्षति श्रुत्युक्तः गौण इति चेत् न । कुतः ? ईक्षणीयवस्तुनि "आत्मानं पश्ये"दिति आत्मशब्द श्रवणात् ॥

ओं तन्निष्ठस्य मोक्षोपदेशात् ओं । ॥ ७ ॥

नात्मशब्दो गौणे मुख्यः । कुतः ? तन्निष्ठस्य (आत्मनिष्ठस्य) पुरुषस्य मोक्षोपदेशात् । न हि गौणात्मनिष्ठस्य मोक्षः ॥

ओं हेयत्वावचनाच्च ओं । ॥ ८ ॥

आत्मनः हेयत्वावचनात् अहेयत्ववचनाच्च न गौणः आत्मशब्दवाच्यः ।

ओं स्वाप्ययात् ओं । ॥ ९ ॥

"आत्मानं विलापयती"ति स्वस्य स्वस्मिन् अप्यय वचनात् न गौणः आत्मशब्दवाच्यः ॥

ओं गतिसामान्यात् ओं । ॥ १० ॥

गतेः सामान्यात् न विष्णोरन्यः जगत्कारणत्वेन शाखान्तरप्रतिपाद्यः ॥

ओं श्रुतत्वाच्च ओं । ॥ ११ ॥

"एको देव" इति श्रुतौ विष्णोः श्रुतत्वाच्च नासौ अशब्दः ॥

६ ओं आनन्दमयोऽभ्यासात् ओं । ॥ १२ ॥

आनन्दमयः विष्णुरेव । कुतः ? ब्रह्मशब्दस्य अभ्यासात् ॥

ओं विकारशब्दान्नेति चेन्न प्राचुर्यात् ओं ॥ १३ ॥

विकारार्थकमयट् शब्दात् आनन्दमयादिर्विष्णुः न इति चेत् न कुतः ? मयट्शब्दस्य प्राचुर्यार्थकत्वात् ॥

ओं तद्धेतुव्यपदेशाच्च ओं । ॥ १४ ॥

तस्य विष्णुत्वे लोकचेष्टकत्वाख्यहेतोः "कोह्येवान्यादि"ति श्रुतौ व्यपदेशात् च आनन्दमयो विष्णुरेव ॥

ओं मान्त्रवर्णिकमेव च गीयते ओं । ॥१५॥

यतः मान्त्रवर्णिकं ब्रह्मैव आनन्दमयादिशब्दैः गीयते । अतश्च आनन्दमयादिशब्दवाच्यः विष्णुरेव ॥

ओं नेतरोऽनुपपत्तेः ओं । ॥१६॥

आनन्दमयः न इतरः कुतः ? इतरस्य मोक्षजनकज्ञानविषयत्वस्य अनुपपत्तेः ॥

ओं भेदव्यपदेशाच्च ओं । ॥१७॥

चतुर्मुखादेरानन्दमयस्य "ते ये शतं" इत्यादि श्रुतौ भेदव्यपदेशात् च नानन्दमय इतरः ।

ओं कामाच्च नानुमानापेक्षा ओं । ॥१८॥

अद्वैतश्रुत्यनुकूलानुमानाभावात् केवलानुमानस्य कामात् च । न अनुमानापेक्षा कार्या ॥

ओं अस्मिन्नस्य च तद्योगं शास्ति ओं । ॥१९॥

यतः अस्मिन् प्रकरणे मोक्षेपि अस्यच तद्योगं "सोऽश्नुते" इत्यादि श्रुतिः शास्ति अतो आनन्दमयादिः ब्रह्मैव ॥

७ ओं अन्तस्तद्धर्मोपदेशात् ओं । ॥२०॥

"अन्तः प्रविष्ट"मित्यादि श्रुतौ श्रूयमाणः विष्णुरेव । कुतः ? "अन्तः समुद्र"इत्यादि श्रुतौ तद्धर्मोपदेशात् ॥

ओं भेदव्यपदेशाच्चान्यः ओं । ॥२१॥

अन्तस्थस्य इन्द्रादिभ्यो भेदव्यपदेशात् च अन्तस्थो इन्द्रादिभ्योऽन्यः ।

८ ओं आकाशस्तल्लिङ्गात् ओं । ॥२२॥

आकाश शब्दवाच्यो विष्णुरेव । कुतः ? "स एष परोवरीयानि"त्यादि श्रुतौ परोवरीयस्त्वादि तल्लिङ्गश्रवणात् ॥

९ ओं अत एव प्राणः ओं । ॥ २३ ॥

"तद्वैत्वं प्राणो अभव" इत्युक्त प्राणः विष्णुरेव । कुतः ? अत एव "श्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति विष्णुलिङ्गादेव ॥

१० ओं ज्योतिश्चरणाभिधानात् ओं । ॥ २४ ॥

ज्योतिः विष्णुरेव । कुतः ? कर्णादीनां विचरणाभिधानात् ।

११ ओं छन्दोऽभिधानान्नेतिचेन्न तथाचेतोर्पण-
निगदात्तथाहि दर्शनम् ओं । ॥ २५ ॥

ज्योतिषः "गायत्री वा इदं सर्वं" इति छन्दोभिधानात् गायत्रीशब्द-वाच्यः विष्णुः न इति चेत् न । कुतः ? हि तथा (गानत्राणकर्तृत्वनिमित्तेन), दर्शनं अस्ति। कुतो गायत्रीशब्देन विष्णोरभिधानमित्यत उक्तम् । तथा चेतोर्पणनिगदात् ॥

ओं भूतादिपादव्यपदेशोपपत्तेश्चैवम् ओं ॥२६॥

"तावानस्य महिमा" इत्यादि श्रुतौ गायत्र्याः भूतादिपादव्यपदेशोपपत्तेश्च एवं गायत्रीशब्दवाच्यो विष्णुरेव ।

ओं उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यवि-
रोधात् ओं । ॥ २७ ॥

"अमृतं दिवि" "परो दिवः" इति उपदेशभेदात् गायत्रीशब्दवाच्यः विष्णुः न इति चेत् न कुतः? उभयस्मिन् श्रुतिवाक्ये अपि त्रिसप्तलोकविवक्षया अविरोधात् ॥

१२ ओं प्राणस्तथानुगमात् ओं । ॥ २८ ॥

"तावा एता" इत्यादि ऐतरेयोक्त प्राणः तथा (विष्णुरेव) कुतः ? देवतोपदेश्यत्वादि विष्णुलिङ्गादि अनुगमात् ॥

ओं न वक्तुरात्मोपदेशादितिचेदध्यात्मस-
म्बन्धभूमाह्यस्मिन् ओं । ॥ २९ ॥

बृहतीसहस्रवक्तुः विश्वामित्रं प्रति इन्द्रेण आत्मनः प्राणतया उपदेशात् इन्द्र एषायं प्राणः न विष्णुः इति चेत् न । किंतु । विष्णुरेव । कुतः ? अनुगमात् । तथा सत्युपदेशविरोध इत्यपि न । कुतः ? हि । अस्मिन् प्रकरणे विष्णोः अध्यात्मसम्बन्धभूमा उक्तोऽस्ति ॥ यद्वा हि अस्मिन् (इन्द्रे) अध्यात्मसम्बन्धभूमा विद्यते । तस्मात् ॥

ओं शास्त्रदृष्ट्यातूपदेशो वामदेववत् ओं ॥३०॥

प्राणस्य विष्णुत्वेपि इन्द्रेण "प्राणोऽहं" इति शास्त्रदृष्ट्यातु । उपदेशः युज्यते । वामदेववत् ।

ओं जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात् ओं । ॥३१॥

शतायुष्ट्वादि जीव लिङ्गानां इन्द्रियदेवैः संवादादिरूप मुख्यप्राणलिङ्गानां च श्रवणात् प्राणो विष्णुः न । इति चेत् न । कुतः ? अनुगमात् । न च लिङ्गविरोधः । तल्लिङ्गानां अन्तर्यामिविषयत्वोपपत्तेः । किमन्तर्यामि कथनमित्यतः । अन्तर्बहिः सर्वगतत्वभेदेन उपासात्रैविध्यात् इह तदाश्रितत्वात् । अधिकारिणां तद्योगात् ॥ ३१ ॥

॥ इति प्रथमाध्यायस्य प्रथमःपादः ॥

——o——

॥ अथ प्रथमाध्यायस्य द्वितीयःपादः ॥

---

१ ओं सर्वत्रप्रसिद्धोपदेशात् ओं । ॥१॥

सर्वत्र उच्यमानं तत्तु । कुतः ? ब्रह्मण्येव प्रसिद्ध ब्रह्मशब्दस्य उपदेशात् ।

ओं विवक्षितगुणोपपत्तेश्च ओं । ॥२॥

"सयोतो" इति श्रुत्या सर्वगते विवक्षितगुणोपपत्तेश्च विष्णुरेव सर्वगतः ॥

ओं अनुपपत्तेस्तु न शारीरः ओं । ॥३॥

शारीरः न सर्वगतः । कुतः ? एकस्य सर्वशरीरस्थत्व अनुपपत्तेः तु ॥

ओं कर्मकर्तृव्यपदेशाच्च ओं । ॥ ४ ॥

सर्वगते वस्तुनि "आत्मानं" इति कर्म त्वस्य जीवेच "शंसती"ति तद्विरुद्ध कर्तृ त्वस्य व्यपदेशात् च न जीवः सर्वगतः ॥

ओं शब्दविशेषात् ओं । ॥ ५ ॥

"एतमेवब्रह्मे"ति वाक्ये ब्रह्म शब्द स्य अवधारणार्थक "एव" शब्द विशेषणात् "ब्रह्म" शब्दो न जीवपरः ॥

ओं स्मृतेश्च ओं । ॥ ६ ॥

"अहमात्मागुडाकेश" इत्यादि स्मृतेः चं विष्णुरेवसर्वगतः न जीवः ।

ओं अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न-निचाय्यत्वादेवं व्योमवच्च ओं । ॥ ७ ॥

सर्वगतवस्तुनः "सर्वेषुभूतेष्वि"ति अर्भकौक स्त्व व्यपदेशात् तद्व्यपदेशात च तस्य (=जीवस्य) व्यपदेशात् च (=तच्छ्रुतिलिंगादिना उक्तत्वाच्च) ब्रह्मैव सर्वगतं न इति चेत् न कुतः ? तेषां विष्णवावेवोपपत्तेः । न च वैयर्थ्यं । एवं निचाय्यत्वात् । व्याप्तस्य विष्णोः कथमल्पस्थानकथनमित्यत उक्तं । व्योमवत् च ॥

ओं सम्भोगप्राप्तिरितिचेन्न वैशेष्यात् ओं ॥ ८ ॥

सर्वजीवशरीरस्थत्वे सम्भोगप्राप्तिः इति चेत् न कुतः ? ब्रह्मणः सामर्थ्य वैशेष्यात् ॥

२ ओं अत्ताचराचरग्रहणात् ओं । ॥ ९ ॥

"सर्वं वा अत्ती"त्युक्तसर्व अत्ता विष्णुरेव । कुतः ? श्रुतौ "सर्व"मिति चराचरस्य ग्रहणात् ॥

ओं प्रकरणाच्च ओं । ॥ १० ॥

"नैवेह किंचने"ति श्रुतौ अबादिसृष्ट्यादिना निरवकाश विष्णु प्रकरणात् च । सर्वात्ता विष्णुरेव ॥

३ ओं गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ओं॥११॥

"ऋतं पिबन्ता"विति श्रुत्युक्तौ ऋतं पिबन्तौ आत्मानौ एव । कुतः ? गुहांप्रविष्टौ हि तद्दर्शनात् ॥

ओं विशेषणाच्च ओं । ॥१२॥

"यः सेतु"रिति श्रुतौ एकवचनेन सेतुत्व ब्रह्मत्वादिना च विशेषणात् च पिबन्तावात्मानावेव । न जीवेशौ ॥

४ ओं अन्तर उपपत्तेः ओं । ॥१३॥

विष्णुरेव चक्षु रन्तरः । कुतः ? "तदमृतमभयमि"त्युक्त अमृतत्वाभयत्वादेर्विष्णावेव उपपत्तेः ॥

ओं स्थानादिव्यपदेशाच्च ओं । ॥१४॥

ब्रह्म स्थानभूत अक्षिशक्तेः आदिशब्दोदिततदधिष्ठातृब्रह्मशक्तेश्च व्यपदेशात् च चक्षुरन्तस्थो विष्णुरेव ॥

ओं सुखविशिष्टाभिधानादेव च ओं ॥१५॥

"कं ब्रह्मे"त्यादि चक्षुरन्तस्थ प्रकरणे विष्णुलक्षणभूत सुखविशिष्टाभिधानात् एव च चक्षुरन्तरो विष्णुरेव ॥

ओं श्रुतोपनिषत्कगत्यभिधानाच्च ओं ॥१६॥

"स एनान् ब्रह्मगमयती"ति श्रुतोपनिषदां कगत्यभिधानात् च चक्षुरन्तरो विष्णुरेव ॥

ओं अनवस्थितेरसम्भवाच्च नेतरः ओं ॥१७॥

इतरः चक्षुरन्तरो न । किं तु विष्णुरेव । कुतः ? अग्नेर्जीवस्य जीवान्तर नियामकत्वे अनवस्थितेः । असम्भवात् च ॥

५ ओं अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ओं १८॥

"एष त आत्मान्तर्यामी"ति श्रुत्युक्तो अन्तर्यामी विष्णुरेव । न प्रधा-

नादिः । कुतः? अधिदैवतादि प्रकरणेषु अन्तर्यामिणि "यं पृथिवी न वेदे"ति अविदितत्वादि तद्धर्मव्यपदेशात् ॥

ओं न च स्मार्तमतद्धर्माभिलापात् ओं ॥१९॥

न च स्मार्तं अन्तर्यामि । कुतः? अतद्धर्माभिलापात् ॥

ओं शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥२०॥

शारीरः च नान्तर्यामी । कुतः? हि यस्मात् उभये माध्यन्दिनाः काण्वाश्च शाखिनः अपि अन्तर्यामिणः सकाशात् भेदेन एनं अधीयते ॥

६ ओं अदृश्यत्वादिगुणको धर्मोक्तेः ओं ॥२१॥

अदृश्यत्वादिगुणकः (अक्षरशब्दवाच्यो) विष्णुरेव । न प्रकृत्यादिः । कुतः? ऋगादिपरविद्या विषयत्वादि विष्णु धर्मोक्तेः ॥

ओं विशेषणभेदव्यपदेशाभ्यां च नेतरौ ओं २२॥

इतरौ न अदृश्यत्वादिगुणकौ । कुतः? सार्वज्ञादि विशेषण "तस्मादेतद्ब्रह्मे"ति "अन्यमीशमिति" च भेदव्यपदेशाभ्यां च ॥

ओं रूपोपन्यासाच्च ओं । ॥२३॥

"यदापश्यः पश्यत" इति श्रुतौ विष्णवसाधारणरुक्म रूप उपन्यासात् च अदृश्यत्वादिगुणको विष्णुरेव ॥

७ ओं वैश्वानरः साधारणशब्दविशेषात् ओं ॥२४॥

"यस्त्वेतमि"त्यादिवाक्यगतवैश्वानरशब्दवाच्यो विष्णुरेव । न त्वग्निः । कुतः? अग्निविष्णवोः साधारणस्य वैश्वानर शब्दस्य "आत्मानं वैश्वानर"मिति आत्मशब्देन विशेषणात् ॥

ओं स्मर्यमाणमनुमानं स्यादिति ओं । ॥२५॥

"अहं वैश्वानरो भूत्वा" इति स्मर्यमाणं अत्रापि विष्णुरेवोच्यत इत्यस्य अनुमानं (अनुमापकं) स्यात् ॥

ओं शब्दादिभ्योंतःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषविध- मपि चैनमधीयते ओं । ॥२६॥

शब्दादिभ्यः अन्तःप्रतिष्ठानात् वैश्वानरो विष्णुर्न इति चेत् न । कुतः? तथा दृष्ट्युपदेशात् । किंच अत्रोक्त आत्मत्वब्रह्मत्वादिलिङ्गानां अग्न्यादौ असम्भवाच्च वैश्वानरो विष्णुरेव । अपि च यतः छन्दोगाः एनं पुरुषविधं अधीयते अतोऽपि वैश्वानरो विष्णुरेव ॥

ओं अत एव न देवताभूतं च ओं । ॥२७॥

अत एव (निरवकाश आत्मशब्दादिहेतोरेव ।) अग्न्यादिरूपा देवता तदभिमन्यमानतेजो भूतं च न वैश्वानरशब्दवाच्यम् ॥

ओं साक्षादप्यविरोधं जैमिनिः ओं । ॥२८॥

साक्षात् ब्रह्मणो अग्न्यादि शब्दवाच्यत्वे अपि अज्ञानादि निमित्तान्तरेण अग्न्यादौ तत्तच्छब्दप्रसिद्धेः अविरोधं जैमिनि राचार्यो वक्ति ॥

ओं अभिव्यक्तेरित्याश्मरथ्यः ओं । ॥२९॥

अग्न्यादिषु ब्रह्मोपास्तौ तेषु ब्रह्मणो अभिव्यक्तेः अग्न्यादिसूक्तनियमो युज्यते इति आश्मरथ्या चार्यो वक्ति ॥

ओं अनुस्मृतेर्बादरिः ओं । ॥३०॥

तत्तत्सूक्ताद्युपासकैः अग्न्यादिष्वेव ब्रह्मणो अनुस्मृतेः अग्न्यादिसूक्तनियम इति बादरिः वक्ति ॥

ओं संपत्तेरिति जैमिनिस्तथाहि दर्शय- ति ओं । ॥३१॥

संपत्तेः इति भावेन सूक्तादि नियम इति जैमिनिः मन्यते । कुतः? "'तं यथे"ति हि प्रसिद्धा श्रुतिः जैमिनिमतं यथा तथा दर्शयति ॥

ओं आमनंति चैनमस्मिन् ओं । ॥ ३२ ॥

एनं (अस्मिन्) अग्न्यादौ श्रुतयः "योऽग्नौ तिष्ठन्नि"त्यादिना आमनन्ति च । अतो अग्न्यादौ विष्णूपास्त्या अग्न्यादि प्राप्तिर्युज्यते । कुतः ? अग्न्यादिप्राप्त्या तत्स्थ भगवत्प्राप्तेरेवाभिप्रेतत्वात् ॥

॥ इति प्रथमाध्यायस्य द्वितीयःपादः ॥

॥ अथ प्रथमाध्यायस्य त्रितीयः पादः ॥

१ ओं द्युभ्वाद्यायतनं स्वशब्दात् ओं । ॥ १ ॥

द्युभ्वाद्यायतनं विष्णुरेव । नत्वन्यः । कुतः । "तमेवैकं जानथ आत्मानं" इति श्रुतौ स्वशब्द पर्याय आत्मशब्दश्रवणात् ॥

ओं मुक्तोपसृप्यव्यपदेशात् ओं । ॥ २ ॥

"अमृतस्यैष सेतुः" इत्यादौ विष्णोरेव मुक्तोपसृप्यव्यपदेशात् । द्युभ्वाद्यायतनं विष्णुरेव नान्यः ॥

ओं नानुमानमतच्छब्दात् ओं । ॥ ३ ॥

न अनुमानं (अनुमानसिद्धप्रामाण्ययुतपाशुपताद्यागमेन सर्वाश्रयतया कल्पित रुद्रो) द्युभ्वाद्यायतनं । कुतः ? द्युभ्वाद्यायतने भस्मधर उग्रादि अतच्छब्दात् (तच्छब्दाभावात्) ॥

ओं प्राणभृच्च ओं । ॥ ४ ॥

प्राणभृत् च एतैरेवहेतुभिः न द्युभ्वाद्यायतनम् ॥

ओं भेदव्यपदेशात् ओं । ॥ ५ ॥

"अन्यमीश"मिति जीवेशयोः भेदव्यपदेशात् न तयोरैक्यं वाच्यम् ।

ओं प्रकरणात् ओं । ॥ ६ ॥

"अन्यमीश"मित्यादेर्विष्णु प्रकरणात् अत्र जीवस्य विष्णुभेद एवोच्यते।

ओं स्थित्यदनाभ्यां च ओं । ॥७॥

ईशजीवयोः "द्वासुपर्णे"त्यादि श्रुत्युक्तकर्मफलानुपजीवन स्थिति कर्मफल अदनाभ्यां च न तयोरैक्यं वाच्यम् ॥

२ ओं भूमासंप्रसादादध्युपदेशात् ओं । ॥८॥

"यो वैभूमातत्सुखं" इत्युक्त भूमा ब्रह्मैव । न तु प्राणः । कुतः? संप्रसादात् (पूर्णसौख्याभिधानात्) अध्युपदेशात् च (नामाद्युपरितदुत्तमत्त्वेन भूम्नो व्यपदेशाच्च) ॥

ओं धर्मोपपत्तेश्च ओं । ॥९॥

"स एवाधस्था"दित्यादिना भूम्नि सर्वगतत्वादि धर्मश्रवणात् । तस्य च विष्णोरेव उपपत्तेः च विष्णुरेव भूमा ॥

३ ओं अक्षरमम्बरांतधृतेः ओं । ॥१०॥

"तद्वा एतदक्षरं" इत्युक्त अक्षरं ब्रह्मैव । न चित्प्रकृतिः । कुतः? "एतस्मिन् खल्वक्षर" इति अम्बरान्तधृतेः (आकाशान्तपदार्थधारकत्व श्रवणात्) ॥

ओं साचप्रशासनात् ओं । ॥११॥

सा च "एतस्य वा" इत्यादि श्रुतौ विष्णोः प्रशासनात् एव भवतीत्युक्ता । अतो ब्रह्मैवाक्षरशब्दवाच्यम् ॥

ओं अन्यभावव्यावृत्तेश्च ओं । ॥१२॥

विष्णव न्य वस्तुस्व भावा नां स्थूलाण्वादीनां "अस्थूलमनण्वि"त्यादिश्रुतौ अक्षरे व्यावृत्तेः च । ब्रह्मैवाक्षरम् ॥

४ ओं ईक्षतिकर्मव्यपदेशात्सः ओं । ॥१३॥

"सदेवे"त्यादौ श्रुतं "सत्" सः (विष्णुरेव) न प्रधानं । कुतः? चेतननिष्ठ ईक्षतिकर्मव्यपदेशात् ॥

५ ओं दहर उत्तरेभ्यः ओं। ॥१४॥

"दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्" इत्यादिवाक्योक्तः दहरस्थः विष्णुरेव। न जीवादिः। कुतः? "य आत्मा अपहतपाप्मा" इत्यादि उत्तर वाक्योक्तनिर्गतपाप्मत्वादि धर्मेभ्यः॥

ओं गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ओं ॥१५॥

"अहरहर्गच्छन्त्य एतं ब्रह्मलोकं" इति वाक्योक्तसुप्तप्राप्यत्व गति ब्रह्म शब्दाभ्यां दहरपद्मस्थो विष्णुरेव। किं च। यतः। "अरश्चेति" श्रुतौ तथा हि (अरण्याख्यसुधासमुद्राश्रयलोकवत्त्वरूप) लिङ्गं च दहरे दृष्टं। अतोऽपि दहरस्थो विष्णुरेव॥

ओं धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ओं ॥१६॥

"स एष सेतुर्विधृति"रिति हृत्पद्मस्थस्य सर्वाधारकत्त्वरूप धृतेः श्रवणात्। दहरस्थो विष्णुरेव। छान्दोग्ये हृत्पद्मस्थ निष्ठतयोक्त सर्वेश्वरत्वादि अस्य महिम्नः अस्मिन् "एष सर्वेश्वर" इति वाजसनेयकसमाख्यानादपि उपलब्धेः च विष्णुरेव दहरस्थः॥

ओं प्रसिद्धेश्च ओं। ॥१७॥

तत्रापि "दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्"। इति श्रुतौ विष्णोः हृत्पद्मस्थत्व प्रसिद्धेः च स एव हृत्पद्मस्थः॥

ओं इतरपरामर्शात्स इति चेन्नासम्भवात् ओं ॥१८॥

("स्वेन रूपेण निष्पद्यते" इत्युक्तस्य) इतर स्य "एष आत्मे"त्यनेन परामर्शात् सः (जीव एव) हृत्पद्मस्थ इति चेत् न। कुतः? हृत्पद्मस्थ निष्ठतयोक्त अपहतपाप्मत्वादिगुणानां जीवे स्वातन्त्र्येण असम्भवात्॥

ओं उत्तराच्चेदाविर्भूतस्वरूपस्तु ओं। ॥१९॥

"स तत्रपर्येति" इति उत्तर (वाक्या) त् जीव एव हृत्पद्मस्थ इति चेत्

न । कुतः? तद्वाक्ये स्वेने"त्युत्तरवाक्यबलात् आविर्भूतस्वरूपः तु प्रतिपाद्यः । न जीवमात्रम् ॥

ओं अन्यार्थश्च परामर्शः ओं । ॥ २० ॥

"एष आत्मे"ति वाक्यगत एतच्छब्द परामर्शः "परंज्योति"रित्युक्त अन्यार्थः च (एव) । न जीवार्थः ॥

ओं अल्पश्रुतेरिति चेत्तदुक्तम् ओं । ॥२१॥

"दहर" इति अल्प स्थानस्थितत्व श्रुतेः जीव एव हृत्पद्मस्थ इति चेत् न । कुतः? यतः । तत् (अल्पस्थानस्थितत्वं) "निचाय्यत्वादेव"मित्यादौ विष्णोः उक्तम् । अतः ॥

६ ओं अनुकृतेस्तस्य च ओं । ॥ २२ ॥

"कथं नु तद्विजानीयां" इति ज्ञानार्थं प्रार्थितत्वरूप आनुकूल्येन गृह्यमाणं ब्रह्मैव न ज्ञानिसुखं । कुतः? तस्य (आनुकूल्येन गृह्यमाणस्य) अनुकृतेः "तमेव भान्तमनुभाति सर्व"मिति सूर्यादीनां भगवत्क्रियानुसारिप्रकाशाख्य क्रियाकर्तृत्वश्रवणात् । "तस्य भासा सर्वमिदं विभाती"ति जगतः परमात्मप्रभाप्रकाशत्वश्रुतेः । च ॥

ओं अपि स्मर्यते ओं । ॥ २३ ॥

"यदादित्यगतं तेजो" इत्यादिषु विष्णोः सूर्यादि भासकत्वं स्मर्यते अपि ॥

७ ओं शब्दादेव प्रमितः ओं । ॥ २४ ॥

"ईशानो भूतभव्यस्ये"त्यादौ ईशानशब्दवाच्यत्वेन प्रमितः विष्णुरेव न तु वायुः । कुतः? "मध्ये वामनमि"ति निरवकाशवामन शब्दादेव ॥

ओं हृद्यपेक्षया तु मनुष्याधिकारत्वात् ओं ॥ २५ ॥

सर्वगतस्य विष्णोरंगुष्ठमात्रत्वोक्तिः हृद्यपेक्षया तु युज्यते । एतद्विद्योपासनस्य मनुष्याधिकार कत्वात अंगुष्ठमात्रोक्तिरपि युज्यते ॥

८ ओं तदुपर्यपि बादरायणः सम्भवात् ओं ॥२६॥

तदुपर्यपि वेदविद्याधिकारः अस्ति । कुतः ? विशिष्टबुद्ध्यादेः सम्भवात् इति बादरायणः वक्ति ॥

ओं विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ओं । ॥२७॥

देवादीनां सादित्वे पूर्वकल्पे प्रवृत्तयज्ञादि कर्मणि वैय्यर्थ्याख्य विरोधः स्यात् इति चेत् न । कुतः ? "यत्र पूर्वे" इति श्रुतौ अनेकेषां देवतापद प्रतिपत्त्युक्तेः "तेहनाकं" इत्यादि श्रुतौ दर्शनात् ॥

ओं शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ओं । ॥ २८ ॥

देवानामाद्यन्तवत्वे शब्दे अप्रामाण्याख्याविरोधः स्यात् इति चेत् न । कुतः ? "धाता यथा" इति अतः । प्रत्यक्षानुमानाभ्यां प्रतिकल्पं नियमेन प्रभव शब्दितोत्पत्त्यवगमात् च उक्तं युक्तम् ॥

ओं अत एव च नित्यत्वम् ओं । ॥ २९ ॥

अत एव च देवप्रवाहस्य नित्यत्वं युक्तम् ॥

ओं समाननामरूपत्वाच्चावृत्तावप्यविरोधो-दर्शनात्स्मृतेश्च ओं । ॥३० ॥

प्राचीनदेवानां मुक्तत्वात् स्वस्वपदेषु अवृत्तावपि अविरोधः । कुतः ? तदन्येषां समाननामरूपत्वात् "यथापूर्व"मिति दर्शनात् "अनादिनिधने"ति स्मृतेश्च ॥

ओं मध्वादिष्वसम्भवादनधिकारं जैमिनिः ओं ३१॥

मध्वादिषु देवानां अनधिकारं जैमिनिः मन्यते । कुतः ? तेषामर्थित्वतत्पदयोग्यत्वादि असम्भवात् ॥

ओं ज्योतिषि भावाच्च ओं । ॥३२॥

देवानां ज्योतिषि सर्ववस्तूनां अन्तर्भावात् च न तेषां ज्ञानार्थिता । अतो मोक्षविद्यास्वप्यनधिकारः ॥

ओं भावं तु बादरायणोऽस्ति हि ओं । ॥३३॥

देवानां सर्वविद्यासु अधिकारसद्भावं बादरायणः तु मन्यते । कुतः ? अस्ति हि अतिशयः ॥

९ ओं शुगस्य तदनादरश्रवणात्तदा द्रवणात्सूच्यते हि ओं । ॥३४॥

अस्य तदनादरश्रवणात् शुक् "सहसं जिहान एवे"त्युत्तरवाक्येन सूच्यते । तदा द्रवणात् ऋषिणा राजा पौत्रायणः शूद्र इति सम्बोधितः । तस्मान्न पौत्रायणः शूद्रः । अतो न शूद्राणां वेदाधिकारः ॥

ओं क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ओं । ॥३५॥

"अश्वतरीरथ" इति उत्तरत्र चैत्ररथेन लिङ्गात् अस्य क्षत्रियत्वावगतेश्च न पौत्रायणः शूद्रः ॥

ओं संस्कारपरामर्शात्तदभावाभिलापाच्च ओं ॥३६॥

"अष्टवर्ष"मित्यादिना वेदाध्ययनात्पूर्वं संस्कारपरामर्शात् शूद्रस्य "नाग्निर्न यज्ञ"इति तदभावाभिलापात् च न तस्य वेदाधिकारः ॥

ओं तदभावनिर्धारणे च प्रवृत्तेः ओं ॥३७॥

सत्यकामस्य तदभावनिर्धारणे च गौतमस्य तदुपनयन प्रवृत्तेः न शूद्रस्य संस्कारो युज्यते ॥

ओं श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ओं ॥३८॥

"श्रवणे त्रपुजतुभ्यां" इत्यादिना शूद्रस्य वेद श्रवणाध्ययनार्थ (अ-

वधारण) प्रतिषेधात् "नाग्निर्न यज्ञः शूद्रस्य" इति स्मृतेश्च न तस्य वेदाधिकारः ॥

१० ओं कंपनात् ओं । ॥३९॥

"महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति" इत्यादौ वज्रशब्दवाच्यो विष्णुरेव । कुतः? "सर्वमेजती"ति कंपन शब्दित सर्वचेष्टकत्वलिङ्गात् ॥

११ ओं ज्योतिर्दर्शनात् ओं । ॥४०॥

"यो यमंतर्जोति"रिति ज्योतिः शब्दवाच्यो विष्णुरेव । न जीवः । कुतः? "विष्णुरेव ज्योति"रित्यादि दर्शनात् ॥

१२ ओं आकाशोऽर्थांतरत्वादिव्यपदेशात् ओं ॥४१॥

"आकाशो वै नामे"ति श्रुत्युक्त आकाशो विष्णुरेव । नत्वन्या कृताकाशः । कुतः? "ते यदन्तरे"ति वाक्ये विष्णोर्नामरूपराहित्याख्य अर्थान्तरत्वादिव्यपदेशात् ॥

१३ ओं सुषुप्त्युत्क्रांत्योर्भेदेन ओं । ॥४२॥

"सयत्तत्र किंचित्पश्यती"ति श्रुत्युक्तस्वप्नादिद्रष्टा परमात्मैव । न जीवः । कुतः? "असङ्गो ह्ययं पुरुष" इत्युक्त असङ्गत्वलिङ्गात् । न च ईश्वराभेदेन जीवेपि असङ्गत्वं युक्तम् । कुतः? सुषुप्त्युत्क्रान्त्योः "प्राज्ञे नात्मना संपरिष्वक्त" इति "प्राज्ञे नात्मनान्वारूढ" इति च जीवेशयोः भेदेन उक्तेः ॥

१४ ओं पत्यादिशब्देभ्यः ओं । ॥४३॥

"एष नित्यो महिमा ब्राह्मणस्ये"ति श्रुत्युक्त ब्राह्मणो विष्णुरेव । कुतः? "सर्वस्याधिपति"रित्यादि सर्वाधि पत्यादि वाचि शब्देभ्यः ॥

॥ इति प्रथमाध्यायस्य तृतीयःपादः ॥

॥ अथ प्रथमाध्यायस्य चतुर्थः पादः ॥

---

१ ओं आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ओं ॥ १ ॥

यतः आनुमानिकमपि एकेषां शाखिनां शाखासु "अव्यक्तात्पुरुषः" इति वाक्यगत अव्यक्तशब्देनोच्यते । अतो न विष्णोः सर्वशब्दवाच्यत्वं युज्यत इति चेत् न । कुतः ? यतो विष्णुरेवाव्यक्तादिशब्दवाच्यः । न प्रधानादि । तत् कुतः ? यतः "अव्यक्तमचल"मित्यादिश्रुतिः । "अव्यक्तोऽक्षर उच्यते" इति स्मृतिः च एवं दर्शयति । अन्यत्राव्यक्तशब्दव्यवहारस्तु शरीररूपके विन्यस्तस्य गृहीतेः ॥

ओं सूक्ष्मं तु तदर्हत्वात् ओं । ॥ २ ॥

यतः सूक्ष्मं तु अव्यक्तवाच्यं । कुतः ? तत् (तस्य) अव्यक्तशब्दप्रवृत्तिनिमित्त अर्हत्वात् । सूक्ष्मत्वं तु विष्णोरेव मुख्यम् । अतस्तस्यैवाव्यक्तशब्दमुख्यवाचित्वम् ॥

ओं तदधीनत्वादर्थवत् ओं । ॥ ३ ॥

परमात्मन्येव परावरदुःखिबद्धत्वादि वाचिशब्दजातं प्रवृत्तिनिमित्तरूप अर्थवत् । कुतः ? तदधीनत्वात् ॥

ओं ज्ञेयत्वावचनाच्च ओं । ॥ ४ ॥

"तमेवैकं जानथे"ति विष्णोरेव मोक्षार्थ ज्ञेयत्ववचनात् । अन्येषां ज्ञेयत्वावचनात् प्रत्युत "विमुंचथे"ति हेयत्ववचनात् च अत्रत्याव्यक्तादिशब्दैः अन्यस्य वाच्यत्वं न युज्यते ॥

ओं वदतीति चेन्न प्राज्ञो हि ओं । ॥ ५ ॥

"अनाद्यनन्त"मिति काठकवाक्यं प्रधानं वदति इति तस्यापि ज्ञेयत्व-

मस्ति इति चेत् न । कुतः ? हि प्राज्ञ शब्दित परमात्मैव तत्र प्रतिपाद्यते । न प्रधानं । अतो न तस्य ज्ञेयत्वम् ॥

ओं प्रकरणात् ओं । ॥ ६ ॥

"सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदं" इति विष्णु प्रकरण बलात् च प्राज्ञनामक विष्णुरेवात्रोच्यते ॥

ओं त्रयाणामेवचैवमुपन्यासः प्रश्नश्च ओं ॥७॥

यतः एवं पितृसौमनस्य स्वर्ग्याग्नि परमात्मरूपाणां त्रयाणां विषयकमेव नचिकेत ऋषिणा यमं प्रति प्रश्नः कृतः तेषामेव उपन्यासः च । अतो नात्र प्रधानं प्रतिपाद्यम् ॥

ओं महद्वच्च ओं । ॥ ८ ॥

"महान्तं विभुमात्मानं" इत्यादि वाक्यगत महत् शब्दस्य यथा विष्णुपरत्वमेव । न महत्तत्वपरत्वम् । तद् वत् च अव्यक्तादि शब्दस्यापि विष्णुपरत्वम् ॥

ओं चमसवदविशेषात् ओं । ॥ ९ ॥

यथा यज्ञपात्रे प्रसिद्धस्यापि चमस शब्दस्य "इदं तच्छिर" इति श्रुति बलेन शिरोवाचकता । तद् वत् अव्यक्तादि शब्दस्य प्रधानादौ प्रसिद्धत्वेपि । विष्णुवाचकत्वमेव । कुतः ? "नामानि सर्वाणी"त्यादि श्रुतेः "इदं" इति श्रुत्या अविशेषात् ॥

२ ओं ज्योतिरुपक्रमात्तु तथाह्यधीयत एके ओं ॥ १० ॥

"वसन्तेवसन्ते ज्योतिषा यजेत" इत्यादौ ज्योति रादि कर्मवाचकत्वेन प्रसिद्धाभिधेयोपि विष्णुरेव । न ज्योतिष्टोमादिः । कुतः ? हि एके शाखिनः । "एष इमं" इति उपक्रमात् (उपक्रम्य) तथा (सर्वशब्दवाचित्वेन) हरिमेव "तावाएता" इत्यत्र अधीयते ॥

ओं कल्पनोपदेशाच्च मध्वादिवदविरोधः ओं ॥११॥

यथा मधुविद्यागत मध्वादि शब्दानां विष्णुवाचित्वेपि न क्षौद्रादि शब्दाभावाख्यं विरोधः । तद् वत् (तथा) परमात्मनः सर्वशब्दवाच्यत्वे अभ्युपगतेऽपि कर्माद्यभाव अविरोधः । कुतः ? शब्दानामन्यत्रयोगरूढिवृत्ती अभ्युपगम्यैव ईश्वरे महायोगवृत्त्यङ्गीकारात् । तदपि कुतः ? "प्राण ऋच" इति सर्वशब्दवाच्यस्य विष्णोः कल्पना शब्दित उपासनार्थं उपदेशात् च ॥

३ ओं न संख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ओं । ॥१२॥

"यस्मिन् पञ्चपञ्चजना" इति बहुत्व संख्योपसङ्ग्रहात् आपि ("यस्मिन्नि"त्याधाराधेयभावत्वानिर्देशादपि) विष्णोः पञ्चजनादि शब्दवाच्यत्वे विरोधो न । कुतः ? तस्य नाना रूपाणां भावात् । अतिरेकाच्च ("यस्मिन्" इत्युक्त आधाररूपस्य "पञ्चजना" इत्युक्त आधेयरूपस्य च सविशेषाभिन्नत्वात्) ॥

ओं प्राणादयोवाक्यशेषात् ओं । ॥१३॥

भगवद्रूपत्वेनोक्ताः पञ्चजनास्तुप्राणादेः प्राणादि प्रदाः । कुतः ? "प्राणस्य प्राण"मित्यादि वाक्यशेषात् ॥

ओं ज्योतिषैकेषामसत्यन्ने ओं । ॥१४॥

एकेषां शाखायां अन्ने असत्यपि ज्योतिषां पञ्चजनसंख्यापूर्तिर्ज्ञातव्या ॥

४ ओं कारणत्वेनचाकाशादिषु यथा व्यपदिष्टोक्तेः ओं । ॥१५॥

"आत्मनः आकाशः सम्भूतः आकाशाद्वायु"रित्यादौ कार्यत्वे सति अवान्तर कारणत्वे न च आकाशादिषु स्थितो विष्णुरेव । न भूतादिः । कुतः ? "सयोतोश्रुत" इत्यादौ विष्णुः यथा अविदितत्वरूपेण व्यपदिष्टः

तद्रूपयुक्तस्यैव आकाशादिषु "यमाकाशो न वेद" इत्यादिवाक्येन उक्तेः ॥

५ ओं समाकर्षात् ओं । ॥१६॥

परमात्मवाचिनः शब्दाः समाकर्षात् अन्यत्र व्यवह्रीयन्ते । तस्मान्नान्यत्र व्यवहारलोपप्रसङ्गः ॥

ओं जगद्वाचित्वात् ओं । ॥१७॥

सर्वशब्दानां परमात्मनः मुख्यवाचकत्वेऽपि लोकव्यवहाराद्धेतोः जगद्वाचित्व ज्ञानात् तेषां तत्र प्रसिद्धिर्युज्यते ॥

ओं जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम् ओं । ॥१८॥

"अस्य यथैकांशाखां जीवो जहाती"ति "वायुना हि सर्वे लोका नेनीयन्ते" इति च जीवमुख्यप्राण योरधीनत्व लिङ्ग श्रवणात् । तयोरपि तत्तच्छब्दमुख्यवाचकता स्यात् इति चेत् । न । कुतः? तत् वाक्यजातं तत्तदन्तर्यामिपरतया व्याख्यातम् ॥

ओं अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ओं । ॥१९॥

[वैदिकशब्दान् समाकृष्य कर्मदेवता प्रतिपादनमपि युक्तमेव । कुतः?] अन्यार्थं तु परमात्मज्ञानार्थमेव । तत्कुत इति चेत् । "कस्मिन्....विज्ञाते"ति शौनकस्य "कथं नु....स आदेशो भवती"ति श्वेतकेतोश्च प्रश्न "द्वे विद्ये वेदितव्ये"ति अङ्गिरसः "यथा सौम्येकेन मृत्पिण्डेने"ति उद्दालकस्य च व्याख्यानाभ्यां इति जैमिनिः मन्यते । अपि च एके शाखिनः एवं "यस्तन्न वेदे"ति अन्यज्ञानस्य परमात्मज्ञानार्थतां स्पष्टं पठन्ति ॥

ओं वाक्यान्वयात् ओं । ॥२०॥

पृथक् पृथगर्थेषु वाचकतया स्थित वाक्यस्य अन्ततो भगवत्परत्वेन अन्वय निमित्तात् कर्मादिकं वेदेन प्रतिपादनीयम् ॥

ओं प्रतिज्ञा सिद्धेर्लिङ्गमाश्मरथ्यः ओं ॥२१॥

"नान्यः पन्था" इत्यादि ज्ञानमेव मोक्षहेतुरिति प्रतिज्ञासिद्धेः लिङ्ग (हेतु) त्वेन कर्मादिकमुच्यते वेदेनेति आश्मरथ्यः आचार्यो मन्यते ।

ओं उत्क्रमिष्यत एवं भावादित्यौडुलोमिः ओं॥२२॥

उत्क्रमिष्यतो धिकारिणः एवं (ज्ञानसाधनतया कर्मादिकमपि) भावात् वेदेन कर्मादि प्रतिपादनं युक्तमेव इति औडुलोमिः आचार्यो मन्यते ॥

ओं अवस्थितेरिति काशकृत्स्नः ओं ॥२३॥

कर्मादि सर्वं परमात्मनि अवस्थितेः तद् ज्ञापनाय कर्मादिकं वेदेन प्रतिपाद्यं इति काशकृत्स्नः आचार्यो मन्यते ॥

६ ओं प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात् ओं २४ ॥

"सैषा प्रकृती"त्याद्युक्त प्रकृत्यादिस्त्रीशब्दवाच्यः च विष्णुरेव । कुतः ? एवं सत्येव "हन्तैतमि"ति प्रतिज्ञा याः "यथे"ति नदीसमुद्र दृष्टांत (स्य च) अनुपरोधात् (अविरोधात्) ॥

ओं अभिध्योपदेशाच्च ओं । ॥२५॥

प्रकृतिर्ब्रह्मैव । कुतः ? प्रकृतित्वेन अभिध्यायाः (ईश्वरेच्छायाः) "प्रकृतिरि"ति स्मृतौ उपदेशात् तथा ब्रह्मणः "सोभिध्या" इत्यादि श्रुतौ अभिध्यात्वोपदेशात् च ॥

ओं साक्षाच्चोभयाम्नानात् ओं । ॥२६॥

"एषस्त्र्येषपुरुषः" इत्यादिना साक्षात् । च एवं उभय शब्दवाच्यत्वस्य आम्नानात् । प्रकृत्यादिर्ब्रह्मैव ॥

ओं आत्मकृतेः परिणामात् ओं । ॥२७॥

प्रकृतेः परिणामं विधाय तत्प्रेरणाय आत्मनः प्रकृतेः (बहुधाकरणा-त्) प्रकृतिर्ब्रह्म ॥

ओं योनिश्च हि गीयते ओं । ॥ २८ ॥

हि "यद्भूतयोनिमि"ति श्रुत्या योनिश्च (स्वदेहादेवापयोत्पादकश्च) गीयते । तस्मात् विष्णुरेव प्रकृत्यादि स्त्रीलिङ्गशब्दवाच्यः ॥

७ ओं एतेन सर्वे व्याख्याता व्याख्याताः ओं २९॥

एतेन (तदधीनत्वाद्युक्तयुक्तिसमुदायेन) सर्वे (शून्य असदादिशब्दाः) मुख्यवृत्त्यापरमात्मवाचिन इति व्याख्याताः ॥

अध्यायसमग्रस्यार्थवधारणार्थं अन्ते द्विरुक्तिः ॥

॥ इति प्रथमाध्यायस्य चतुर्थः पादः ॥

——o——

॥ अथ द्वितीयाध्यायस्य प्रथमः पादः ॥

१ ओं स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ओं ॥ १ ॥

स्मृतीनां पाशुपतादिरूपाणां विष्णु जगत्कर्तृत्वादौ अनवकाशेन श्रुतीनां विष्णुकारणतापरत्वे तद्विरोधेन दोषप्रसङ्ग इति चेत् न । कुतः? पाशुपतादिभ्यो प्रबलतमपांचरात्रादि अन्यस्मृतीनां रुद्रादिजगत्कारणत्वे अनवकाशेन तद्विरुद्धशैवादिस्मृतीनां अप्रामाण्याख्य दोषप्रसङ्गात् तद्विरोधस्याकिंचित्करत्वात् ॥

ओं इतरेषां चानुपलब्धेः ओं । ॥२॥

अनुपलब्धेरितरेषां (उपलब्धियोग्यपाशुपताद्युक्तफलानां) अनुपलब्धेः । तासामप्रामाण्यमेव युक्तम् ॥

२ ओं एतेन योगः प्रत्युक्तः ओं । ॥ ३ ॥

एतेन (फलादर्शनहेतुनैव) योगः (शास्त्रप्रयोगः) प्रत्युक्तः ॥

ओं न विलक्षणत्वादस्य तथात्वंच शब्दात् ओं ॥४॥

अस्य (श्रुति स्मृतिरूपस्य शास्त्रस्य) तथा त्वं शैवादि स्मृतिवद्-प्रामाण्यं न । कुतः? श्रुतेर्नित्यत्वेन श्रौतस्मृतेः तदनुसारित्वेन च विलक्षणत्वात् । तथा त्वं च (नित्यत्व तदनुसारित्वरूपवैलक्षण्यवत्वं च) "वाचा विरूपनित्यया" इत्यादि शब्दात् सिद्धम् ॥

ओं दृश्यते तु ओं । ॥ ५ ॥

"इतरेषां" इत्यत्र प्रसक्त श्रुत्याद्युक्तफलं तद्योग्य अधिकारिविशेषाणां तु दृश्यते । अतो नाप्रामाण्यम् ॥

३ ओं अभिमानिव्यपदेशस्तु विशेषानु-गतिभ्याम् ओं । ॥ ६ ॥

"मृदब्रवी"दित्यादौ अभिमानि व्यपदेशस्तु । नत्वचेतनस्य । तथा च मृन्नवक्री जडत्वादित्यादियुक्तिविरोधेन न वेदाप्रामाण्यम् । किंच । अभिमानी चेतनानां विशेषानुगतिभ्यां (विशेषसामर्थ्यसर्वाभिमन्यमान व्याप्तिभ्यां) सदेहत्वेप्यदर्शनम् अन्यवस्त्वाधिष्ठाने वक्तृत्वम् । अनेकाभिमन्यमानाधिष्ठातृत्वं । सर्वं युज्यते ॥

ओं दृश्यते च ओं । ॥ ७ ॥

तासां सामर्थ्यं च महद्भिः दृश्यते च । अतो नाप्रामाण्यम् ॥

४ ओं असदिति चेन्न प्रतिषेधमात्रत्वात् ओं ॥८॥

"असदेवेदमग्र आसीत्" इत्युक्त असत् जगत्कर्ता इति चेत् न । कुतः? प्रतिषेधमात्रत्वात् अभावाख्यधर्मतामन्तरेण निषिद्धबुद्धिविषयत्वात् ।

ओं अपीतौतद्वत्प्रसङ्गादसमञ्जसम् ओं ॥ ९ ॥

अपीतौ (प्रलये) तद्वत्प्रसङ्गात् (असन्मात्रत्वप्रसङ्गात्) असत् कर्तृत्वं असमञ्जसम् ॥

ओं न तु दृष्टान्तभावात् ओं । ॥ १० ॥

प्रळये सर्वासत्वं न युज्यते । कुतः ? तदा सर्वपदार्थसत्वे तु एव दृष्टांत (स्य) भावात् ॥

ओं स्वपक्षदोषाच्च ओं । ॥ ११ ॥

प्रळये सर्वासत्व इति स्वपक्षे दृष्टान्ताभावाख्य दोषात् च न तत्पक्षो युक्तः ॥

ओं तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ओं ॥ १२ ॥

दृष्टान्ताभावादिरूप तर्कस्य अप्रतिष्ठानात् । सिद्धान्त्युक्तप्रकारात् अन्यथापि । प्रतितर्केण अनुमेयमिति चेत् । न । कुतः ? एवमपि (एवं सति) अनिर्मोक्षप्रसङ्गः ॥

ओं एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः ओं । ॥ १३ ॥

एतेन (स्वपरपक्षयोः दृष्टान्तभावाभावाख्यहेतुना) शिष्टाः अपरिग्रहाः पक्षा अपि व्याख्याताः (प्रत्याख्याताः) ॥

५ ओं भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ओं १४॥

भोक्तुः (जीवस्य) मोक्षे ब्रह्मत्व आपत्तेः "परेऽव्यये" इत्यादिश्रुतौ श्रवणात् । तयोः अविभागः (भेदाभावः) तस्मान्न ब्रह्मणः जगत्कारणत्वं इति चेत् । न । कुतः ? ब्रह्मणो जीवाभेद एव नास्ति । श्रौतस्तु एकीभावः लोकवत् (यथा एकजले जलान्तरस्यैकीभावोक्तिः) तथात्रापि स्थानैक्यालम्बनेन जीवेशयोरैक्योक्तिः स्यात् (उपचरिता भवेत्) अतो नोक्तदोषः ॥

६ ओं तदनन्यत्वमारम्भणशब्दादिभ्यः ओं ॥१५॥

स्वतन्त्रसाधनस्य तदनन्यत्वं वाच्यं । कुतः ? आरम्भणा द्याक्षेपक "किंस्विदि" त्यादि शब्दादिभ्यः (अत्र 'आदि' पदेन स्वातन्त्र्याद्युक्ति रुच्यते) ॥

ओं भावेचोपलब्धेः ओं । ॥ १६ ॥

तदन्यस्वतन्त्रसाधनस्य भावे (सत्त्वे)। उपलब्धेः प्रसङ्गः। नोपलभ्यते। अतः च तदनन्यत्वम् ॥

ओं सत्त्वाच्चावरस्य ओं । ॥१७॥

अवरस्य (तदधीनस्य साधनस्य) सत्त्वात् च (एव) "अस्मात्सम्भूत" इत्यादिवचनं तत्परं भवति । न पूर्वसूत्रविरोधः ॥

ओं असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ओं । ॥ १८ ॥

प्रळये "नासदासी"दिति स्वतन्त्रसाधनस्य असत् (असत्व) व्यपदेशात् अन्यसत्वं न युक्तं इति चेत् न । कुतः ? "तम आसीत्" इति वाक्यशेषात् । अन्यसत्वस्य निषेधस्तु अस्वातन्त्र्यादि धर्मान्तरेण (धर्मविशेषेण) युज्यते ॥

ओं युक्तेः शब्दांतराच्च ओं । ॥ १९ ॥

लीलया दण्डमवष्टभ्य गन्तुः पंगुत्वाभावात् । भगवतोऽपि स्वाधीनसाधनावलम्बनस्य युक्तेः (युक्तत्वात्) "शक्तोऽपी"त्यादि शब्दान्तरात् च उक्तं युक्तम् ॥

ओं पटवच्च ओं । ॥२०॥

पट सृष्टि वत् च विश्वसृष्टिरपि कर्तृभिन्नसाधनान्तरसाध्या ॥

ओं यथा प्राणादिः ओं । ॥ २१ ॥

यथा प्राण देहेन्द्रिया दिः न स्वतन्त्रः । एवं प्रकृत्यादि साधनान्तरम् ॥

४

७ ओं इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ओं । ॥ २२ ॥

यदि "जीवाद्भवन्तीति" श्रुतौ इतरव्यपदेशात् स एव कर्ता नेश्वर इति चेत् तर्हि हिताकरणादिदोषप्रसक्तिः नस्यात् । स च विद्यते च जीवे । तस्मान्न जीवः स्वतन्त्रकर्ता ॥

ओं अधिकं तु भेदनिर्देशात् ओं । ॥ २३ ॥

ब्रह्म तु जीवापेक्षया अधिकं । कुतः ? "श्रोतामन्ते"त्यादौ भेद (श्रोतृत्वादि विशेष) निर्देशात् ॥

ओं अश्मादिवच्च तदनुपपत्तिः ओं ॥ २४ ॥

जीवस्य चेतनत्वेपि अश्मादिवत् अस्वतन्त्रत्वात् तदनुपपत्तिः (स्वतन्त्रकर्तृत्वानुपपत्तिः) ॥

ओं उपसंहारदर्शनान्नेति चेत् क्षीरवद्धि ओं ॥२५॥

जीवे उपसंहारदर्शनात् च न स्वतन्त्रकर्तृत्वानुपपत्तिः इति चेत् न । कुतः ? हि क्षीरवत् । तथा जीवकृतोपसंहारोऽपि परमात्मकृत एव ॥

ओं देवादिवदपि लोके ओं । ॥ २६ ॥

सतोऽपि ईश्वरस्य अदर्शनं युज्यते । कुतः ? लोके देवादिवत् (देवानां पिशाचादीनां अस्वतन्त्राणां अपि अदृश्यत्वशक्तिर्दृष्टा) किमु ईश्वरस्य ॥

ओं कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवा ओं॥२७॥

जीवस्य स्वतः कर्तृत्वे सर्वकात्स्न्येन प्रवर्तने च अङ्गीकृते कृत्स्नप्रसक्तिः । तत्परिहाराय एकदेशेन प्रवृत्त्यभ्युपगमे च "नित्यो निरवयव" इत्यादि श्रुत्युक्तनिरवयत्व शब्दकोपो वा स्यात् ॥

८ ओं श्रुतेस्तु शब्दमूलत्वात् ओं ॥ २८ ॥

ईश्वरकर्तृत्वपक्षे पूर्वोक्तयुक्तिविरोधदोषो नास्ति । कुतः? "योऽसौ विरुद्ध" इत्यादि श्रुतेः तु । श्रौतमपि युक्तिविरुद्धं कथमङ्गीकार्यमित्यत उक्तम् । शब्दमूलत्वात् (शब्दैकसमधिगम्यत्वात्) ॥

ओं आत्मनि चैवं विचित्राश्च हि ओं ॥२९॥

हि आत्मनि च एवं सकलयुक्तिविरोधनिरासकाः विचित्राः ("विचित्रशक्तिरि"ति श्रुतिप्रसिद्धशक्तयः) संति । न जीवे । तस्मात् च जीवपक्ष एव युक्तिविरोधः नेश्वरपक्षे ॥

ओं स्वपक्षदोषाच्च ओं । ॥३०॥

"ये दोषा" इति श्रुत्या स्वपक्षदोषात् च जीवपक्षे युक्तिविरोधस्यदोषस्यैव युक्तः । नासावदोषतां नेतव्यः ॥

ओं सर्वोपेता च तद्दर्शनात् ओं । ॥३१॥

यतः परमात्माख्य देवता न केवलं सामान्यतो विचित्रशक्तिमती किं तु सर्वोपेताच । कुतः? "सर्वैर्युक्ते"ति श्रुतौ तद्दर्शनात् । अतो नेश्वरे युक्ति विरोधः शंकनीयः ॥

ओं विकरणत्वान्नेति चेत्तदुक्तम् ओं ॥३२॥

"अपाणिपादमि"ति श्रुत्या ईश्वरस्य विकरणत्वात् तस्य कर्तृत्वं न युक्तं इति चेत् न । कुतः? यस्मात् । तत् प्राकृतपाण्यादिविषयमिति "न तस्ये"तिश्रुतौ उक्तम् । तस्मात् ॥

९ ओं न प्रयोजनवत्वात् ओं । ॥३३॥

ईश्वरस्य सृष्ट्यादौ प्रवृत्तिः न स्वप्रयोजनार्थं । कुतः? प्रयोजनवत्वात । (तस्य पूर्णानन्दत्वेन प्राप्तप्राप्तव्यत्वात्) ॥

ओं लोकवत्तु लीलाकैवल्यम् ओं । ॥३४॥

लोकवत् तु लोके मत्तादिप्रवृत्तिरिव ईश्वरप्रवृत्तेः लीलाकैवल्यं (केवलं लीलारूपत्वमेव) न स्वप्रयोजनोद्देश्यत्वम् ॥

ओं वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ओं । ॥ ३५ ॥

ईश्वरस्य कर्मापेक्षया फलदातृत्वाङ्गीकारे तस्य वैषम्य नैर्घृण्ये न । कुतः ? सापेक्षत्वात् (ईश्वरस्य कर्मापेक्षत्वाभ्युपगमात्) तत्कुतः ? हि "पुण्येन पुण्य"मिति श्रुतिः तथा दर्शयति ॥

ओं न कर्माविभागादिति चेन्नानादित्वात् ओं । ॥ ३६ ॥

वैषम्यनैर्घृण्यादिदोषपरिहाराय ईशेन अपेक्षणीयं यत् कर्म तत् न (नास्ति) कुतः ? कर्माविभागात् तस्य कर्मणः अस्वतन्त्रवस्तुभ्यः अविभक्तत्वात् (अस्वतन्त्रत्वादिति यावत्) तथा च स्वाधीनकर्मापेक्षया वैषम्यादेरपरिहारः । इति चेत् न कुतः ? अनादित्वात् (कर्मपरम्परायाः अनादित्वात्) ॥

१० ओं उपपद्यतेचाप्युपलभ्यते च ओं ॥ ३७ ॥

ईश्वरस्य कर्मापेक्षायां स्वातन्त्र्यं उपपद्यते च । कर्मणः स्वाधीनत्वात् । ननु पुनः स्वाधीनकर्मसापेक्षत्वकृतवैषम्यापात इत्यत उक्तम् । आपि उपलभ्यते च ("सकारयेदि"ति श्रुत्या तादृशवैषम्यमपि अदोषत्वेन ज्ञायते एव) ॥

११ ओं सर्वधर्मोपपत्तेश्च ओं । ॥ ३८ ॥

विष्णोः स्वातन्त्र्यादिना सर्वधर्मोपपत्तेः च तस्य पूर्णगुणत्वं युक्तम् ॥

॥ इति द्वितीयाध्यायस्य प्रथमःपादः ॥

——o——

॥ अथ द्वितीयाध्यायस्य द्वितीयः पादः ॥

१ ओं रचनानुपपत्तेश्च नानुमानम् ओं ॥१॥

अनुमानं (सांख्यानुमानकल्पितं प्रधानं) न जगत्कर्तृ । कुतः? रचनानुपपत्तेः। (तस्य जडत्वेन स्वतःप्रवृत्त्यनुपपत्तेः) च (प्रमाणाभावाच्च)॥

ओं प्रवृत्तेश्च ओं । ॥२॥

"अहंकरोमी"ति चेतनस्य स्वतः प्रवृत्तेः दर्शनात् च । न प्रधानं जगत्कर्तृ ॥

ओं पयोंबुवच्चेत्तत्रापि ओं । ॥३॥

पयोम्बुवत् प्रधानस्य स्वतःप्रवृत्तिरस्तु इति चेत् न । कुतः यतः तत्रापि अन्ततः ईश्वरादेव प्रवृत्तिः ॥

ओं व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ओं ॥४॥

"न ऋत" इति श्रुत्या व्यतिरेकानवस्थितेः (ईश्वरस्य व्यतिरेकेण कस्यापि कर्मणः असत्त्वावगमात्) तत एव अचेतनस्त्रष्टृत्वपरनिरीश्वरसांख्यमतस्य अप्रामाण्यात् । अत एव अनपेक्षत्वात् च । न तद्विरोधो विष्णुकर्तृत्वस्य ॥

२ ओं अन्यत्राभावाच्च न तृणादिवत् ओं ॥५॥

"यच्च किंचि"दित्यादि श्रुतिभ्यो ईश्वरात् अन्यत्र जगतो अभावात् । प्रकृत्यादिकारणसत्तादेरपि ईश्वरायत्ततवा च न तृणादिवत् अनुग्राहकत्वमात्रमीश्वरस्य । किंतु सर्वस्वातन्त्र्यमपि ॥

३ ओं अभ्युपगमेप्यर्थाभावात् ओं ॥६॥

चार्वाकैः स्वशास्त्रस्य सिद्धान्तत्वानभ्युपगमे सिद्धमस्मदिष्टम् । अभ्युपगमेऽपि। अर्थाभावात् (सिद्धान्तत्वव्यापकयोः विषयप्रयोजनयोरभावात्) स्वव्याघातस्यादिति न तत्पक्षोऽपि युक्तः ॥

ओं पुरुषाश्मवदिति चेत्तथापि ओं । ॥७॥

पुरुषाश्मवत् (यथा पुरुषसम्बन्धात् अचेतनं शरीरं अश्मानयनादौ प्रवर्तते तथा अचेतनप्रकृतिः जीवसम्बन्धात् प्रवर्तते) इति **चेत्** न । कुतः? **तथापि** (एवमचेतनप्रकृतेः पुरुषसम्बन्धात्प्रवृत्तावपि) "न ऋते" इति श्रुत्या ईश्वराधीनत्वमेव सिद्धं । अत एव तत्रापि दृष्टान्ताभावः ॥

४ ओं अङ्गित्वानुपपत्तेः ओं । ॥८॥

जीवस्य अङ्गत्वे अङ्गीकृते सति शरीरस्य **अङ्गित्वानुपपत्तेः** ॥

५ ओं अन्यथानुमितौ च ज्ञशक्तिवियोगात् ओं ॥९॥

प्रागुक्तात् **अन्यथा** (प्रकृत्युपसर्जन पुरुषकर्तृत्वस्य पुरुषाश्मदृष्टान्तेन) **अनुमितौ च** अङ्गित्वानुपपत्तिः । कुतः? ज्ञ स्य शरीरसम्बन्धार्थं प्रवृत्तिशक्तिवियोगात् ॥

ओं विप्रतिषेधाच्चासमञ्जसं ओं । ॥१०॥

विप्रतिषेधात् च अनीश्वरमतं **असमञ्जसम्** ॥

६ ओं महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ओं ॥११॥

यथात्र्यणुकादिगतात् महत्वात् दीर्घत्वाच्चतुरणुकादिगतपरिमाणमुत्पद्यते। तथा द्व्यणुकपरमाणूभयगत ह्रस्वपारिमाण्डिल्य परिमाणा भ्यामपि त्र्यणुकद्व्यणुकगतपारिमाणोत्पत्तिः स्यात् । अन्यथा । महत्वदीर्घत्वाभ्यामपि कार्योत्पत्तिर्नस्यात्। कुतः? कारणविशेषाभावात् । तस्माद्वैशेषिकमतमनुपपन्नम् ॥

ओं उभयथापि न कर्मातस्तदभावः ओं ॥१२॥

यतः **उभयथापि** (ईश्वरेच्छायाः नित्यत्वानित्यत्वपक्षयोरपि) **न कर्म** (परमाणुषु क्रियोत्पत्तिसम्भवः) । **अतः** (परमाणुक्रियाभावात्) **तदभावः** (ईश्वरेच्छया द्व्यणुकादि कार्याभावः) अतो द्वेधापि दुष्टत्वेन नेश्वरेच्छानिमित्तम् ॥

ओं समवायाभ्युपगमाच्च साम्याद-नवस्थितेः ओं । ॥ १३ ॥

वैशेषिकैः अवयवावयव्यादीनां भिन्नत्वनिमित्तेन समवाय सम्बन्धस्य अभ्युपगमात् समवाय्यसमवायिनोरपि भिन्नत्व साम्यात् तत्रापि समवायाभ्युपगमे अनवस्थितेः च न तन्मतं युक्तम् ॥

ओं नित्यमेव च भावात् ओं ॥ १४ ॥

ईश्वरेच्छायाः समवायिकारणपरमाणूनां च सदा भावात् । नित्यमेव कार्योत्पत्तिः स्यात् । न तु कदाचित्प्रलयः ॥

ओं रूपादिमत्वाच्च विपर्ययोदर्शनात् ओं ॥१५॥

किंच वैशेषिकमते पृथिव्यतैजसपरमाणूनां रूपादिमत्वात् । विपर्ययः (अनित्यत्वं) स्यात् । कुतः ? दर्शनात् (यद्रूपि तदनित्यमिति व्याप्तेः घटादौ दृष्टत्वात्) ॥

ओं उभयथाचदोषात् ओं ॥ १६ ॥

वैशेषिके उभयथाच (परमाणु नित्यत्वानित्यत्वपक्षद्वयेऽपि) दोषात् (तद्वत् सर्वनित्यत्वरूपकारणाभावनिमित्तकतदुत्पत्त्यभावरूपदोषसत्वात्) न तत्पक्षो युक्तः ।

ओं अपरिग्रहाच्चात्यंतमनपेक्षा ओं ॥ १७ ॥

वैशेषिकमतस्य अपरिग्रहात् (श्रुत्यादिपरिग्रहशून्यत्वात्) तद्विरुद्धत्वाच्च तत्र अत्यन्तमनपेक्षा (अनादरः) कार्यः ॥

७ ओं समुदाय उभयहेतुकेऽपि तदप्राप्तिः ओं ॥१८॥

यतः समुदाये (परमाणुसमुदाये अनेकत्वरूप) उभयहेतुकेपि (मिलितानेकपरमाणुनिमित्तके विरलानेकपरमाणुनिमित्तकेवा अङ्गीकृते सत्यपि) तस्य (समुदायस्य) अप्राप्तिः (अनुपपत्तिः) । कुतः ? अन्योन्याश्रयादि दोषात । अतः । परमाणुपुञ्ज एव घटावयवीति बौद्धपक्षोऽपि न क्षमः ॥

ओं इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्र निमित्तत्वात् ओं । ॥ १९ ॥

परमाणुपुञ्जस्य सदा सत्वेऽपि न प्रलयानुपपत्तिः कुतः? तद्व्यवहारादेः **इतरेतरप्रत्ययत्वात्** (इदमिदं चेति परमाणुपरस्परापेक्षाबुद्धिनिमित्तकत्वात्) तथा च तादृशबुद्ध्यभावकाले समुदायस्य व्यवहारादेरसत्वात् प्रलयोपपत्तिः । **इति चेत् न** । कुतः? परमाणूनां स्वसमुदायस्य **उत्पत्तिमात्रनिमित्तत्वात्** । न तेभ्यो परमाणूनां इतरेतरापेक्षा बुद्ध्यादेरप्युत्पत्तिः । तथा च तन्निमित्तकव्यवहारादिः क्षणिकमते न कदापि सम्भवति ।

ओं उत्तरोत्पादे च पूर्वनिरोधात् ओं ॥२०॥

क्षणिकमते न विशेषकार्योत्पत्तिर्युक्ता । कुतः? **उत्तरोत्पादे च** (कारणस्य स्वसदृशकार्यजनने एव) सामर्थ्यात् । किंच **उत्तरस्य** स्वसदृशकार्योत्पादे च (उत्पत्तौ सत्यामेव) **पूर्वनिरोधात्** (पूर्वस्य कारणस्य नाशात्) पुनर्विसदृशकार्यजनकत्वासम्भवः ॥

ओं असतिप्रतिज्ञोपरोधोयौगपद्यमन्यथा ओं ॥२१॥

क्षणिकमते न प्रतिक्षणं कार्योत्पत्तिर्युज्यते । कुतः? **असति** कारणे कार्यमुत्पद्यते इत्यङ्गीकारे) तस्य तत्कार्यमिति **प्रतिज्ञायाः** (सिद्धान्तव्यवहारस्य) **उपरोधो** (हानिः) स्यात् । **अन्यथा** (कारणे सति कार्यमुत्पद्यते इत्यङ्गीकारे) **यौगपद्यं** (कारणकार्याणामेकदावस्था) प्रसज्जते ॥

ओं प्रतिसंख्याप्रतिसंख्या निरोधाप्राप्तिरविच्छेदात् ओं । ॥२२॥

एवं क्षणिकमते **प्रति संख्याप्रतिसंख्या** (ससंताननिस्सन्तान) **निरोधयोः** (नाशयोः) **अप्राप्तिः** (अनुपपत्तिः) कुतः? **अविच्छेदात्** (तद्रीत्याकार्योत्पत्तावेव कार्याणां चाविच्छिन्नत्वात्) ॥

ओं उभयथाच दोषात् ओं ॥ २३ ॥

उभयथाच (कारणे सति कार्यं भवत्येवेति पक्षे तदभावपक्षे च) दोषात् (कार्यकारणाविशेषरूप सदाकार्यानुत्पत्तिरूपदोषसत्वात्) क्षणिकपक्षो न युक्तः ॥

ओं आकाशे चाविशेषात् ओं ॥२४॥

यदि दीपादौ परिमाणविशेषात् क्षणिकत्वस्य सिद्धत्वात् । तद्दृष्टांतेन । अन्यत्रापि तदनुमीयते । तर्हि आकाशे अविशेषात् । स्थायित्वस्य सिद्धत्वेन । तद्दृष्टान्तेन । सत्वहेतुनैव । अक्षणिकत्वमप्यनुमीयेत ॥

ओं अनुस्मृतेश्च ओं ॥२५॥

न सत्वहेतुना क्षणिकत्वसाधनं युक्तं । कुतः ? तदेवेदमिति अनुस्मृतेः च । क्षणिकत्वविरोधाच्च ॥

८ ओं नासतोऽदृष्टत्वात् ओं ॥२६॥

असतः (शून्यस्य) जगत्कर्तृत्वं न युक्तं कुतः ? प्रमाणाभावात् । तत् कुतः ? अदृष्टत्वात् (क्वाप्यसतः कारणत्वादर्शनात्) अतः प्रत्यक्षादि प्रमाणाभावात् ॥

ओं उदासीनानामपि चैवं सिद्धिः ओं ॥२७॥

एवं सति उदासीनानामपि कार्यसिद्धिः स्यात् च (अन्यथा शून्यादपि कार्योत्पत्तिर्नस्यात् ।)

ओं नाभाव उपलब्धेः ओं ॥२८॥

जगत् अभावः न । कुतः ? उपलब्धेः ॥

ओं वैधर्म्याच्च न स्वप्नादिवत् ओं ॥२९॥

जगत् स्वप्नवत् (स्वाप्नवस्तुन्यारोपितजाग्रत्वादिवदपि असत्) न । कुतः ? वैधर्म्यात् (स्वाप्नजाग्रत्वस्य बाध्यत्वाख्य विलक्षणधर्मवत्वात् । जगति च तदभावात् ॥

९ ओं न भावोऽनुपलब्धेः ओं ॥ ३० ॥

जगत् भावः (ज्ञानात्मकमपि) न कुतः ? अनुपलब्धेः (ज्ञानज्ञेययोरभेदाननुभवात् ॥)

ओं क्षणिकत्वाच्च ओं ॥ ३१ ॥

ज्ञानस्य क्षणिकत्वाच्च (एकक्षणावस्थायित्वात्) जगतः स्थायित्वात्तद्विरोधान्न तयोरैक्यम् ॥

ओं सर्वथानुपपत्तेश्च ओं ॥ ३२ ॥

(प्रमाणाभावात् । सर्वश्रुतिस्मृतियुक्तिविरुद्धत्वाच्च) सर्वथा अनुपपत्तेः च नैते पक्षाः ग्राह्याः ॥

१० ओं नैकस्मिन्नसंभवात् ओं ॥ ३३ ॥

जैनोक्तसप्तप्रकाराः एकस्मिन् वस्तुनि न युक्ताः कुतः ? असंभवात् (अप्रामाणिकत्वेन तेषामेकत्रासंभावितत्वात् ॥)

ओं एवञ्चात्माकात्स्न्र्यम् ओं ॥ ३४ ॥

एवंच (आत्मनः कायपरिमाणे अङ्गीकृतेसति) आत्मनः (प्राक् पिपीलिका देहप्राप्तस्य तत्कायपरिमितस्य जीवस्य) अकार्त्स्न्यं (गजगर्दभादि शरीरप्राप्तावपूर्णतास्यात्) तथा व्यतिरेके देहातिरेकः स्यात् । ततश्च सर्वदेहचेष्टाभावो कायपरिमाणत्वभंगो वा स्यात् ॥

ओं न च पर्यायादप्यविरोधो विकारादिभ्यः ओं ॥ ३५ ॥

पर्यायात् (क्रमेण तत्तद्देहपरिमाणत्वांगीकारात्) अपि अविरोधः (उक्तदोषाभावः) इति न युज्यते । कुतः ? यतः पर्यायो न युज्यते । तदपि कुतः ? विकारादिभ्यः (तथासति परिमाणभेदेन वस्तुभेदात् । आत्मनो विकारित्वापत्तेः । ततश्चानित्यत्वानिर्मोक्षशास्त्रवैयर्थ्याख्यदोषप्रसंगात् ॥)

ओं अंत्यावस्थितेश्चोभय नित्यत्वाद-विशेषात् ओं ॥३६॥

अंत्यस्य (मुक्तिगत आत्मपरिमाणस्य) अवस्थितेः (तदवच्छेदकतया नित्यदेहावश्यंभावेन मुक्ताववस्थितेः) उभयस्य मुक्तावात्मतद्देहयोः नित्यत्वात् अद्यतन देहानामपि नित्यत्वं स्यात्। कुतः? देहत्वा विशेषात्। तस्मान्न कायपरिमाणमात्मनो युज्यते ॥

११ ओं पत्युरसामञ्जस्यात् ओं ॥३७॥

पत्युः जगत्कारणत्वं न युक्तं। कुतः? पारतन्त्र्यजनिमृत्यादिना असामञ्जस्यात् ॥

ओं संबन्धानुपपत्तेः ओं ॥३८॥

शिवस्य अशरीरत्वेन जगता कार्यकर्तृत्व संबन्धानुपपत्तेः। न तस्य जगत्कर्तृत्वम् ॥

ओं अधिष्ठानानुपपत्तेश्च ओं ॥३९॥

प्रलये सर्वेषां नष्टत्वात् पुनः सृष्टिकाले पशुपतेः पृथिव्यादि अधिष्ठानानुपपत्तेश्च। न तस्य जगत्कर्तृत्वम् ॥

ओं करणवच्चेन्न भोगादिभ्यः ओं ॥४०॥

साधनजातं पशुपतेः करणवत् इति चेत् न। कुतः? शरीरकृतसुखदुःखादि भोगादि दोषेभ्यः ॥

ओं अंतवत्वमसर्वज्ञता वा ओं ॥४१॥

शिवस्य देहवत्वे अंतवत्वं। अन्यथा असर्वज्ञता वा स्यात्। अतो न पाशुपतमतं युक्तम् ॥

१२ ओं उत्पत्त्यसंभवात् ओं ॥४२॥

पुरुषाननुग्रहीत स्त्रीमात्रात् अपत्यस्य उत्पत्त्यसंभवात्। न शक्तिर्जगत्कारणम् ॥

ओं नच कर्तुः करणम् ओं ॥४३॥

यदि शक्त्यनुग्राहकपुरुषोऽङ्गीक्रियते तथापि कर्तुः तस्य च न उत्पत्त्युपयोगिज्ञानादि करणं अस्ति । अतः न तस्य शक्त्यनुग्राहकत्वम् ॥

ओं विज्ञानादिभावेवा तदप्रतिषेधः ओं ॥४४॥

शक्त्यनुग्राहकशिवस्य विज्ञानादिभावे वा तत् (तस्य पाशुपतपक्षस्य) अप्रतिषेधः (अनुमतिः कृता) स्यात् । स च दूषित एव ॥

ओं विप्रतिषेधाच्च ओं ॥४५॥

विप्रतिषेधाच्च शाक्तिमतमसमंजसम् ॥

॥ इति द्वितीयाध्यायस्य द्वितीयःपादः ॥

॥ अथ द्वितीयाध्यायस्य तृतीयः पादः ॥

---

१ ओं न वियदश्रुतेः ओं ॥१॥

वियत् अनुत्पत्तिमत् न । कुतः ? अश्रुतेः ॥

ओं अस्तितु ओं ॥२॥

नाकाशोत्पत्तौ प्रमाणाभावः । कुतः ? "आत्मन आकाशः संभूतः" इति श्रुतिः आस्तितु (अस्त्येव) ॥

ओं गौण्यसंभवात् ओं ॥३॥

"अनादिर्वायमाकाशः" इति श्रुतिः गौणी । कुतः ? अन्यथा उत्पत्तिश्रुतिबाहुल्यस्य असंभवात् ॥

ओं शब्दाच्च ओं ॥४॥

'अथ हवाव नित्यानीति' शब्दाच्च अनादिश्रुतिः गौणी । अन्या मुख्यार्था ।

ओं स्याच्चैकस्य ब्रह्मशब्दवत् ओं ॥ ५ ॥

एकस्य च (एकस्यैव) अनुत्पत्तिवाचिशब्दस्य विष्णौ मुख्यत्वेऽपि आकाशे अमुख्यत्वं **स्यात्** । कुतः ? **ब्रह्मशब्दवत्** (यथा ब्रह्मशब्दस्य परब्रह्माणि मुख्यत्वेऽपि विरिंचादिषु गौणत्वम्) अतः ॥

ओं प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ओं ॥६॥

ब्रह्मणोऽन्यस्य नित्यत्वे "स इदं सर्वमसृजत" इत्यादि प्रतिज्ञाहानिः स्यात् । कुतः ? आकाशस्य सर्वशब्दार्थस्य अव्यतिरेकात् । किंच । "आत्मावा इदमेक एवाग्र आसीत्" इत्यादि स्पष्ट शब्देभ्यः । अनुत्पत्तिमच्छब्दः ब्रह्मण्येव मुख्यः । अन्यत्रामुख्यः ॥

ओं यावद्विकारन्तु विभागो लोकवत् ओं ॥७॥

यावद्विकारन्तु (विकारिण एव । विक्रियमाणवस्तुन एव) **विभागो** (अल्पशक्तिः) दृश्यते । कथं ? **लोकवत्** (यथा लोके घटादौ विभक्तत्वात् विकारित्वमङ्गीकृतम् । तथा आकाशादेरपि विभक्तत्वहेतुना विकारित्वं सिध्यति) तत एव सादित्वं । उत्पत्तिमत्वम् ॥

२ ओं एतेन मातरिश्वा व्याख्यातः ओं ॥ ८ ॥

एतेन (मुख्यामुख्यानुत्पत्तिवचनेन विभक्तत्वादिहेतुना च) **मातरिश्वा** (मुख्यवायुः) **व्याख्यातः** (उत्पत्तिमत्वेनोक्तः) ॥

३ ओं असंभवस्तु सतोऽनुपपत्तेः ओं ॥ ९ ॥

सतः (विष्णोः) **असम्भवः** (अनुत्पत्तिः) **तु** (एव) न त्व "सतः सदजायत" इति श्रुत्या असतः सकाशादुत्पत्तिः । कुतः ? **अनुपपत्तेः** (सतः असदुत्पत्तेरयोगात्) ॥

४ ओं तेजोतस्तथाह्याह ओं ॥ १० ॥

"वायोरग्नि"रित्यादेः **तेजः** विष्णोरन्यतः (वायोः) उत्पद्यत इति न ग्राह्यः । किन्तु **अतः** (परब्रह्मणः) एव तदपि जायते । कुतः ? हि ' तत्तेजोऽसृजत" इति श्रुतिः **तथा आह** तस्मात् ॥

५ ओं आपः ओं ॥ ११ ॥

आपः (अतः तथाह्याह) ब्रह्मण एव जायन्ते। न त्वग्नेः । कुतः ? हि "ब्रह्मैवेद"मितिश्रुतिः तथा आह तस्मात् ॥

६ ओं पृथिव्यधिकाररूपशब्दान्तरादिभ्यः ओं ॥ १२ ॥

पृथिवी एव "ता अन्नमसृजते"त्यादि श्रुतिस्थ अन्नशब्देनोच्यते । न प्रसिद्धान्नं । कुतः ? भूतानां अधिकारत्वात् (प्रकरणत्वात्) कृष्णरूपस्य श्रवणात् । "पृथिवी वा अन्नं"इति शब्दान्तरात् । अपौरुषेयत्वेन अदोषस्य वाक्यस्य नाऽप्रामाण्यमित्यादि युक्तिभ्यः ॥

७ ओं तदभिध्यानादेव तु तल्लिंगात्सः ओं ॥ १३ ॥

सः (विष्णुरेव) संहर्ता । नतु "रुद्रो माविशान्तक"इत्यादिश्रुत्या रुद्रः । कुतः ? तदभिध्यानात् "तस्याभिध्यानादि"ति श्रुत्युक्तत्वात् । तस्य " अभिध्यान " रूपशब्दज्ञापितसंजिहीर्षाविशेषितादनादिबन्धसंहारेच्छारूपात् । तल्लिङ्गादेव (सादि जगत्संहर्तृत्वसाधकलिंगादेव) किमु 'यमप्येति' इत्यादिश्रुतिभ्यः ॥

८ ओं विपर्ययेणतु क्रमोत उपपद्यतेच ओं ॥ १४ ॥

अतः (उत्पत्तिक्रमात्) विपर्ययेण लयक्रमः । न तु उत्पत्तिक्रमेण । कुतः ? अतस्तु (अत एव "व्युत्क्रमादि"ति श्रुतेरेव) किंच । उपपद्यते (युज्यते चायं क्रमः । पूर्वोत्पन्नानां उत्तरोत्पन्नेभ्यो अधिकसामर्थ्येन तेषामधिककालावस्थानस्य युक्तत्वात्) ॥

९ ओं अंतराविज्ञानमनसीक्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ओं ॥ १५ ॥

विज्ञानमनसी अंतरा (अन्यत्र) व्युत्क्रम क्रमेण लयः । न तयोरपि । कुतः ? "मनसश्च विज्ञानमि"त्यत्र पूर्वोत्पन्नतया मनसः "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनी"ति पूर्वमेव लयोक्तिरूप तल्लिंगात् (सा-

धकदर्शनात्) इति चेन्न । कुतः ? अविशेषात् (विज्ञानमनस्तत्वयोरन्यथा लयविषयकविशेषप्रमाणाभावात्) ॥

ओं चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात् ओं ॥१६॥

तत् ('मनसश्च विज्ञान'मिति) व्यपदेशस्तु । चराचरव्यपाश्रयः भाक्तः स्यात् (मनो विज्ञानशब्दित इंद्रियवृत्तिज्ञानविषयक एव स्यात्) न तु मनो विज्ञानतत्वविषयकः । कुतः ? तद्भावभावित्वात् (तस्मिन् चराचरविषये चेतनाचेतनविषये । तद्भावेन मनोभावेन आलोचनेन । भावित्वात् (उत्पद्यमानत्वात्) अतो न पूर्वोक्तलिंगदर्शनं बाधकम् ॥

१० ओं नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ओं ॥१७॥

आत्मा (परमात्मा) न विलीयते । कुतः ? अश्रुतेः किंच ताभ्यः ('स नित्यो निर्गुण'इत्यादि श्रुतिभ्यः) नित्यत्वात् ॥

११ ओं ज्ञोऽतएव ओं ॥१८॥

ज्ञः (जीवोऽपि) अतः (विष्णोः) उत्पद्यत एव । कुतः ? अत एव ('अविनष्टा एवोत्पद्यन्ते' इति श्रुतेः ॥

ओं युक्तेश्च ओं ॥१९॥

जीवस्य अनादिनित्यस्य । ईशाधीनदेहवत्वरूपोत्पत्तेः युक्तेश्च (युक्तत्वाच्च) जीव उत्पत्तिमानेव ॥

१२ ओं उत्क्रान्तिगत्यागतीनाम् ओं ॥२०॥

'सोऽस्मादि'ति वाक्योक्त उत्क्रान्तिगत्यागतीनां हेतूनां सकाशाज्जीवोऽणुरेव । न विभुः ॥

ओं स्वात्मनाचोत्तरयोः ओं ॥२१॥

जीवः स्वात्मनाच (स्वतन्त्रपरमात्मनैव) उत्क्रान्त्यादिमान् । न स्वतः । कुतः ? 'स एतेनैव स्वात्मना' 'एष ह्येनं' इति उत्तर वाक्यद्वयोः बलात् ॥

ओं नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात् ओं ॥२२॥

अतच्छ्रुतेः ('व्याप्ताह्यात्मान'इति अणुत्वविरुद्धव्याप्तत्वश्रुतेः) जीवः न अणुः इति चेत् न । कुतः ? व्याप्तश्रुतेः इतराधिकारात् (परमात्मप्रकरणत्वात्) ॥

ओं स्वशब्दोन्मानाभ्यांच ओं ॥ २३ ॥

'एषो ह्यात्माध्युद्गतो मानशक्तेः' इत्यादि वाक्यशेषस्थ स्वशब्दगृहीतब्रह्मवाचक 'आत्म'शब्दात् । उन्मान शब्दित अपरिमितत्वलिङ्गाच्च । व्याप्तत्वश्रुतिर्विष्णुपरैव । न जीवपरा ॥

ओं अविरोधश्चन्दनवत् ओं ॥ २४ ॥

अणोरपि जीवस्य स्वांशैः सर्वशरीरव्याप्तौ अविरोधः । कुतः ? चन्दनवत् (एकदेशपतितहरिचन्दनबिन्दोः स्वांशैः सर्वशरीरव्याप्तिवत्) ॥

ओं अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदिहि ओं ॥ २५ ॥

अवस्थितिवैशेष्यात् (देहे क्वचित्प्रदेशे चन्दनबिन्दोः सम्यगवस्थानसत्त्वात्) तस्य व्याप्तत्वं युक्तं। न तथा जीवस्य। तदभावात् । इति चेत् न कुतः ? हि 'हृदि ह्येष'इतिश्रुत्या जीवस्यापि हृदये सम्यगवस्थानं अभ्युपगमात् । अतः ।

ओं गुणाद्वालोकवत् ओं ॥ २६ ॥

आलोकवत् (यथा दीपस्य प्रभया व्याप्तिः तद्वदणोरपि चिद्रूपस्य जीवस्य गुणाद्वा (प्रकाशगुणाद्वा) शरीरव्याप्तिर्युज्यते । ('अविरोधश्चन्दनवत्' इति सूत्रोक्तांशतो व्याप्तिः देवानां । 'गुणाद्वे'ति सूत्रोक्तप्रकाशतो व्याप्तिस्तु मनुष्याणाम्) ॥

१३ ओं व्यतिरेको गन्धवत्तथा च दर्शयति ओं ॥२७॥

गन्धवत् (यथा पुष्पगन्धस्य) स्वांशैः **व्यतिरेको** (विभाग) स्तथा-अणोरपि जीवस्य स्वांशैरंशशक्त्या व्यतिरेको युज्यते । कुतः ? यतः 'अथैक एवे'ति श्रुतिः 'अचिन्त्ये'ति स्मृतिः **च तथा दर्शयतः** ॥

१४ ओं पृथगुपदेशात् ओं ॥२८॥

जीवः परमात्मनः **पृथक्** एव । कुतः ? 'भिन्नोऽचिन्त्य'इति श्रुतौ तथा उपदेशात् ॥

ओं तद्गुणसारत्वात्तद्व्यपदेशः प्राज्ञवत् ओं ॥२९॥

प्राज्ञवत् (ब्रह्मणीव) यथा प्राज्ञे परब्रह्मणि 'सर्वं खल्विदं ब्रह्मे'ति जगदभेदोक्तिः तथा जीवे । **तद्व्यपदेशः** ('तत्वमसी'ति ब्रह्मैक्योक्ति) युज्यते । कुतः ? **तद्गुणसारत्वात्** (जीवस्य ब्रह्मगुणसदृशचिदानन्दादिगुणस्वरूपत्व निमित्तात्) **तु** (एव) ॥

१५ ओं यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ओं ॥३०॥

जीवस्य **यावदात्मभावित्वात्** (यावत्परमात्मसत्वात् । नित्यत्वात् ।) 'सोऽनादिरेवे'ति श्रुत्यप्रामाण्य**दोषो न** । कुतः ? । **तत्** (तस्य । नित्यत्वस्य) 'नित्यो जीव'इति **दर्शनात्** (श्रुतावुक्तत्वात्) **च** ('आत्मा नित्यः' 'जीवो नित्य'इति स्मृतिद्वयाच्च) ॥

१६ ओं पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ओं ॥३१॥

पुंस्त्वादिवत् (यथा पुरुषयोषिदादीनामपत्योत्पत्तिशक्तिस्वरूपत्वेऽपि कालविशेषे तदभिव्यक्तिः तथा) **सतः** (जीवस्वरूपत्वेन मुक्तेः पूर्वमपि विद्यमानस्यैव) **अस्य** ज्ञानानन्दादेः मुक्तौ **अभिव्यक्तियोगात्** "आनंदीभवती"ति श्रुत्युपपत्तेः । न जीवस्यानंदादिरूपत्वे तच्छ्रुतिविरोधः । जीव आनन्दादिरूप एव ॥

ओं नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतर-नियमो वान्यथा ओं ॥ ३२ ॥

अन्यथा जीवस्यानन्दादेरावरणानङ्गीकारे । मुक्तियोग्यानां नित्योपलब्धिः (नित्यमानन्दाद्यनुभवः स्यात्) तमोयोग्यानां अनुपलब्धिप्रसंगः (न कदाप्यानंदाद्यनुभवः स्यात् । किन्तु दुःखाद्यनुभव एव स्यात्) एवं मध्यमनुष्याणां । अन्यतरयोः (सुखदुःखानुभवयोः) नियमः स्यात् । तस्माज्जीवस्यावरणमङ्गीकार्यम् ॥

१७ ओं कर्ताशास्त्रार्थवत्त्वात् ओं ॥ ३३ ॥

जीवोऽपि कर्ता । कुतः ? तथा सत्येव विधिनिषेधरूप शास्त्रस्य अर्थवत्त्वात् (प्रयोजनवत्त्वात्) अन्यथा वैय्यर्थ्यप्रसङ्गात् ॥

ओं विहारोपदेशात् ओं ॥ ३४ ॥

मोक्षेऽपि "जक्षन् क्रीडन्" इत्यादि विहारकर्तृत्वस्य उपदेशात् । जीवः परमार्थत एव कर्ता । न काल्पनिककर्ता ॥

ओं उपादानात् ओं ॥ ३५ ॥

जीवस्यमोक्षार्थे साधनादि उपादानात् (अनुष्ठानदर्शनात्) ततः फलदर्शनाच्च न जीवः संसारेऽपि काल्पनिककर्ता ॥

ओं व्यपदेशाच्च क्रियायां नचेन्निर्देश-विपर्ययः ओं ॥ ३६ ॥

"आत्मानमेव लोकमुपासीते"तिजीवस्य उपासन क्रियायां व्यपदेशाच्च तस्य कर्तृत्वं श्रुत्यापि सिद्धम् । न चेत् जीवस्य कर्तृत्वेन ईश्वरस्य कर्मत्वेन च उक्त निर्देशस्य विपर्ययः "आत्मैवोपासीतेति" एवं रूपं वैपरीत्यं स्यात् ॥

ओं उपलब्धिवदनियमः ओं ॥ ३७ ॥

उपलब्धिवत् (यथा जीवस्य उपलब्धौ । ज्ञाने) अनियमः स्वेच्छानुसारेण ज्ञानालाभः तथा क्रियायामपि अनियमः । ईश्वरस्य तु नियमसद्भावात् स एव कर्ता न जीवः इत्युक्तं प्राक् । न तु जीवस्य सर्वथा कर्तृत्वाभावात ॥

ओं शक्तिविपर्ययात् ओं ॥३८॥

ईशजीवयोः **शक्तिविपर्ययात्** (पूर्णापूर्णरूपशक्तिभेदमपेक्ष्य) तयोः कर्तृत्वमपि स्वातन्त्र्यपारतन्त्र्यभेदभिन्नम् ॥

ओं समाध्यभावाच्च ओं ॥३९॥

समाध्यभावात् (अलंबुध्यभावात् ।) च न जीवस्य स्वतंत्रकर्तृत्वम् ॥

ओं यथा च तक्षोभयथा ओं । ॥४०॥

अपि च । **यथा तक्षा उभयथा** प्रासादादिकारयितृ प्रेरितत्वेन तत्कर्तृत्वेन च व्यपदिश्यते । तथा ईश्वरनियतोऽपि जीवः कर्तेति वक्तुं शक्यते ।

ओं परात्तु तच्छ्रुतेः ओं । ॥४१॥

जीवस्य कर्तृत्वशक्तिः **परात्** (ईश्वरात्) तु (एव) कुतः ? "कर्तृत्व"-मित्यादिना **तत्** (जीवकर्तृत्वस्य ईश्वराधीनत्व) **श्रुतेः** ॥

ओं कृतप्रयत्नापेक्षस्तु विहितप्रतिषेधावैयर्थ्यादिभ्यः ओं । ॥४२॥

ईश्वरः **विहितप्रतिषेधावैयर्थ्यादिभ्यः** (विधिनिषेधशास्त्रस्य प्रयोजकत्वाय स्ववैषम्यनैर्घृण्यपरिहाराय च) **कृतप्रयत्नापेक्षः तु** (जीवकृतप्रयत्नयोग्यतापेक्षमाण एव) जीवं प्रेरयति । अतो जीवशक्तेरीश्वराधीनत्वेऽपि शास्त्रस्य अप्रयोजकत्वं नापद्यते ।

१८ ओं अंशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके ओं ॥४३॥

नानाव्यपदेशात् (पितृपुत्रत्वादि नानाप्रकारेण जीवस्य परमात्मोपकर्तृत्वेन तत्सम्बन्धित्वेन "मांरक्ष"त्वित्यादि श्रुतिषु उक्तत्वात्) अन्यथा च ("न सम्बन्धः परस्य" "नाशावस्य" इत्यसम्बन्धित्वेनाप्युक्तत्वात्) जीवः परस्य अंशः (अंश इवांशः । तदुपजीवित्वेन तच्छेषभूतः) किंच । यतः । एके शाखिनो अन्यथा (पराद्भेदेन) एनं अधीयते । एवं एके (परे शाखिनः) परब्रह्मणः दाशकितवादित्वं (दाशादिरूपजीवभावं दाशकितवादेर्ब्रह्मत्वं । तदभेदं) अधीयते । अतोऽपि जीवः परस्य अंशः (तन्यूनत्वे सति तत्सदृशत्वरूपांशत्वोपेतः) ॥

ओं मन्त्रवर्णात् ओं । ॥ ४४ ॥

"पादोऽस्य विश्वाभूतानी"ति मन्त्रवर्णात् जीवः परमात्मांशः ।

ओं अपि स्मर्यते ओं । ॥ ४५ ॥

"ममैवांशो जीवलोके जीवभूतः सनातन" इति अपि स्मर्यते । अतोऽपि जीवः परमात्मांशः ।

ओं प्रकाशादिवन्नैवं परः ओं ॥ ४६ ॥

जीवः प्रकाशादिवत् (खद्योताद्यभिमानि तेजोंशवत् परमात्मनो भिन्नांशः) परः (मत्स्यादिरूपी ईश्वरस्तु) नैवं (जीववद्भिन्नांशो न ।) किन्तु प्रकाशादिवत् (कालाग्न्याद्यभिमानि तेजोंऽशवत् ईशाभिन्नांशः ॥

ओं स्मरन्ति च ओं । ॥ ४७ ॥

स्मृतिकर्तारः जीवेशयोर्भिन्नाभिन्नांशत्वे "एते स्वांशकला" इत्यादिस्मृत्या स्मरन्ति च (कथयन्ति च) ॥

ओं अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ओं । ॥ ४८ ॥

ज्योतिरादिवत् (चक्षुर्गोळकादिस्थित अपभ्रष्टदेवतादेः) तत्तद्देहसंबन्धात् (सूर्यवरुणाद्यनुज्ञाया तत्प्रवृत्त्यादेरिव) जीवस्यापि तत्तद्देहसम्बन्धा-

द्धेतोः अनुज्ञापरिहारौ (परमात्मानुज्ञाधीनप्रवृत्तिबन्धपरिहारौ)। न तथा मत्स्यादेः। किंतु ज्योतिरादिवत् (सूर्यप्रभाद्यभिमानिनः। यथा तदधीन प्रवृत्त्यादिमत्वं तथेशाधीनप्रवृत्तिरेव) अतोऽपि जीवः परमात्मनो भिन्नांशः। मत्स्यादिस्तु अभिन्नांशः ॥

ओं असंततेश्चाव्यतिकरः ओं । ॥ ४९ ॥

जीवस्य शक्त्या असंततेः (अपूर्णत्वात्) मत्स्यादेश्च पूर्णत्वात् उक्तस्य अव्यतिकरः (व्यत्यासाभावः) ॥

ओं आभास एव च ओं । ॥ ५० ॥

यतो जीवः परस्य आभास एव (प्रतिबिम्ब एव) मत्स्यादिस्तु न तथा। च (अतोऽप्युक्तस्य न व्यत्यासः।)

१९ ओं अदृष्टानियमात् ओं । ॥ ५१ ॥

अदृष्टानियमात् (विद्याकर्मसंस्काराणां वैचित्र्यात्) प्रतिबिम्बभूतजीवानामपि देवदानवमानवादि वैचित्र्यं युज्यते। अतो जीवः भगवत्प्रतिबिम्ब एव॥

ओं अभिसन्ध्यादिष्वपि चैवम् ओं । ॥ ५२ ॥

अभिसन्ध्यादिष्वपि इच्छाद्वेषसुखदुःखादिष्वपि एवं अदृष्टादि वैचित्र्यादेव वैचित्र्यं। प्रतिक्षण वैचित्र्यं च एवं कुतः? अदृष्टवैचित्र्यमेव जीववैचित्र्यकारणम्। न रागद्वेषादिदोषा वैचित्र्यम् ॥

ओं प्रदेशादिति चेन्नांतर्भावात् ओं ॥ ५३ ॥

स्वर्गनरकभूम्यादि प्रदेश विशेषात् देवादिवैचित्र्यं इति चेत् न। कुतः? स्थानवैचित्र्यकारणस्य अदृष्टवैचित्र्य एव अन्तर्भावात। एकदेशस्थितानामेव वैचित्र्यदर्शनाच्च ॥

॥ इति द्वितीयाध्यायस्य तृतीयः पादः ॥

—*—

॥ अथ द्वितीयाध्यायस्य चतुर्थः पादः ॥

१ ओं तथा प्राणाः ओं ॥ १ ॥

यथाऽऽकाशादयः परमात्मन उत्पद्यन्ते तथा प्राणाः (इन्द्रियाणि) अपि उत्पद्यन्त एव । न त्वनुत्पत्तिमन्तः ॥

ओं गौण्यसंभवात् ओं ॥ २ ॥

"प्राणा एवानादय"इति अनादित्वश्रुतिः गौणी (गौणानादित्वापेक्षया सूक्ष्मरूपेण अनुत्पत्तिविषया) । कुतः ? मुख्यानादित्वस्य असंभवात् ॥

ओं प्रतिज्ञानुपरोधाच्च ओं ॥ ३ ॥

"इदं सर्वमसृजते"ति प्रतिज्ञायाः अनुपरोधात् (अविरोधान्निमित्तात्) च । प्राणा उत्पद्यन्त इत्यङ्गीकार्यम् ॥

२ ओं तत्प्राक्श्रुतेश्च ओं ॥ ४ ॥

तत् (तेभ्यः अन्येन्द्रियेभ्यः) प्राक् (पूर्वं) श्रुतेः ("एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च" इति तस्य उत्पन्नत्वेन श्रवणात्) च ("पूर्वं मनस्समुत्पन्नं" इति वायुप्रोक्तवचनाच्च) मन उत्पत्तिमदेव ॥

३ ओं तत्पूर्वकत्वाद्वाचः ओं ॥ ५ ॥

तत् (मनः) पूर्वकत्वात् (कारणकत्वात्) वाचः (वाक्) उत्पत्तिमती ॥

४ ओं सप्तगतेर्विशेषितत्वाच्च ओं ॥ ६ ॥

गतेः (ज्ञानस्य) जनकानीन्द्रियाणि सप्तसंख्याकानीति निर्णय एव । नत्वनिर्णयः । कुतः ? "सप्तप्राणा"इति श्रुतौ उत्तरत्र "गुहाशयां निहिताः सप्तसप्ते"ति बुध्यर्थं निहितत्वविशेषणयुक्ततया विशेषितत्वात् । 'सप्तप्राणास्त्ववगते'रिति वचनाच्च ॥

ओं हस्तादयस्तु स्थितेऽतो नैवम् ओं ॥ ७ ॥

हस्तादयः इंद्रियाणि तु स्थिते (कर्मार्थानि) अतो (अस्माद्वैलक्षण्यात्) एवं (ज्ञानेन्द्रियसहभावेन) न पठितानि । अतस्तेषां सप्तता सिद्धैव ॥

५ ओं अणवश्च ओं ॥८॥

प्राणाः अणवः (स्वतो अणूनि) । न केवलं अणूनि । किन्तु तेजसा व्याप्तानि च ॥

६ ओं श्रेष्ठश्च ओं ॥९॥

यथेतरे प्राणाः उत्पद्यन्ते एवं श्रेष्ठः च (मुख्यप्राणोऽपि) विष्णोरुत्पद्यत एव । न त्वनुत्पत्तिमान् ॥

ओं न वायुक्रिये पृथगुपदेशात् ओं ॥१०॥

"एतस्मादि"ति प्राणोत्पत्तिश्रुत्या वायुक्रिये (बाह्यवायु चेष्टाख्यकर्मणी) न प्रतिपाद्ये । किन्तु मुख्यवायुरेव । कुतः ? "सप्राणमसृजते"त्यादौ मुख्यवायूत्पत्तेः वायुक्रियोत्पत्तिभ्यां सकाशात् पृथगुपदेशात् ॥

७ ओं चक्षुरादिवत्तु तत्सह शिष्ट्यादिभ्यः ओं ॥११॥

चक्षुरादिवत् मुख्यप्राणोऽपि परमात्मवशः तु (एव) न स्वतन्त्रः । कुतः ? तत्सह (तैः सह चक्षुरादिभिः सह) मुख्यप्राणस्यापि 'सर्वं ह्येवैतदि'तिश्रुतौ पराधीनतया शिष्ट्यादिभ्यः (उक्तेः) 'सर्वकर्ते'त्यादिवचनोक्त युक्तिभ्यश्च ॥

ओं अकरणत्वाच्च न दोषस्तथा हि दर्शयति ओं ॥१२॥

इतरेषां प्राणानां करणत्वात् । मुख्यप्राणस्य च अकरणत्वात् (कर्तृप्रयोज्यरूपकरणभिन्नत्वात्) तस्यान्येभ्य उत्तमत्वसिद्धेः । न दोषः (मुख्यप्राणस्वातंत्र्यवाचिश्रुतेरवान्तरेश्वरपरत्वाभावदोषो नास्ति) कुतः ? हि "तानि हवा"इति श्रुतिः तथा दर्शयति अतः ॥

८ ओं पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ओं । ॥१३॥

मनोवत् (मनस इव। यथा मनसः) मनोबुद्ध्यहंकारचित्तचेतनाख्य-पञ्चप्रकारोपेतत्वं तथा मुख्यप्राणोऽपि। **पञ्चवृत्तिः** (प्राणापानादि पञ्चरूपवान्) कुतः? यस्मात् "पञ्चवृत्ये"ति श्रुतौ तथा **व्यपदिश्यते** अतः ॥

९ ओं अणुश्च ओं । ॥१४॥

मुख्यप्राणः अन्तः प्राणरूपेण अणुः । बहिः वायुरूपेण व्याप्तश्च ॥

१० ओं ज्योतिराद्यधिष्ठानं तु तदामननात् ओं ॥१५॥

यत् ज्योतिराद्यधिष्ठानं (अग्न्यादिभूतप्रेरकं) तत्तु (तद्ब्रह्मैव) ज्योतिराद्यधिष्ठानं च (चक्षुरादिप्रेरकं) । न जीवः । कुतः? "यश्चक्षुषि तिष्ठन्नि"त्यादिना तदामननात् ॥

ओं प्राणवता शब्दात् ओं । ॥१६॥

प्राणवता (जीवेनैव) कर्त्री चक्षुरादिस्वप्रयोज्यकरणैः परमात्मा दर्शनादिकारयति । न जीवप्रयोज्यैः । कुतः? "एष ह्यनेने"त्यादि **शब्दात्** ॥

ओं तस्य च नित्यत्वात् ओं । ॥१७॥

तस्य (जीवस्य) करणस्य च तयोः सम्बन्धस्य च अनादि **नित्यत्वात्** । चक्षुरादीनां ब्रह्मकरणत्वेऽपि जीवकरणत्वश्रुतिरपि युज्यते ॥

११ ओं त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ओं । ॥१८॥

श्रेष्ठादन्यत्र (मुख्यप्राणमृते) ये प्राणाः **त** एव **इन्द्रियाणि** । न तु मुख्यप्राणोऽपि । कुतः? "द्वादशैवेन्द्रियाणि" इति श्रुतौ **तद्व्यपदेशात्** ॥

ओं भेदश्रुतेः ओं ॥१९॥

मुख्यप्राणस्य सर्वकर्तृकारयितृत्वरूप **भेदकधर्मस्य** । अन्येषां तदभावस्य च "स्थित एवहीति" श्रुतौ **श्रुतेः** (श्रुतत्वात्) । न तस्य चक्षुरादिसाम्यम् ॥

ओं वैलक्षण्याच्च ओं ॥२०॥

मुख्यप्राणस्य तदितरप्राणानांच केवलेश्वराधीनत्व ईश्वरजविभयाधीनत्वरूप वैलक्षण्यात् "प्राणाग्नय एवैतस्मिन्पुरे जाग्रती"ति श्रुतेश्च। न तस्येन्द्रियत्वम् ॥

१२ ओं संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत-उपदेशात् ओं ॥२१॥

संज्ञामूर्तिक्लृप्तिः (नामरूपात्मकदेहेन्द्रियप्रपञ्चसृष्टिः) **त्रिवृत्कुर्वतः** (तेजोऽबन्नानां मिश्रणं कुर्वतः) विष्णोस्सकाशात्। **तु** (एव) भवति । न विरिञ्चात् । कुतः? 'सर्वाणि रूपाणी'ति श्रुतौ तथा **उपदेशात्** ॥

ओं मांसादिभौमं यथा शब्दमितरयोश्च ओं ॥२२॥

शरीरे **मांसादि** रेव **भौमं** (पार्थिवं) न सर्वशरीरं । किंतु "यत्कठिनं" इत्यादि **यथा शब्दं** तत्र **इतरयोश्च** (अप्तेजसोश्च) अस्ति शोणितमज्जादिकार्यमप्यंगीकार्यं । किंच **मांसादि भौमं** न केवलं भौमं । किंतु तत्र "विमिश्राणीहि भूतानी"ति **यथा शब्दं इतरयोश्च** अप्तेजसोश्च कार्यमप्यङ्गीकार्यम् ॥

ओं वैशेष्यात्तु तद्वादस्तद्वादः ओं । ॥२३॥

तद्वादः (पार्थिवमाप्यं तैजसमिति शरीराणां विशेषोक्तिः) **तु वैशेष्यात्** (पृथिव्यादि भूतानां तत्तच्छरीरविशेष संयोगमपेक्ष्य युज्यते) ॥

एतदध्यायोक्त सर्वार्थावधारणार्थं अन्तेद्विरुक्तिः ॥

॥ इति द्वितीयाध्यायस्य चतुर्थः पादः ॥

॥ इति द्वितीयाध्यायः समाप्तः ॥

॥ अथ तृतीयाध्यायस्य प्रथमः पादः ॥

१ ओं तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्नपरिहाराभ्याम् ओं ॥१॥

जीवः पूर्वदेहं हित्वा तदन्तरस्य (देहान्तरस्य) प्रतिपत्तौ (प्राप्त्यर्थं) संपरिष्वक्तः (पृथिव्यादिभूतसंसक्त एव) रंहति (गच्छती) ति ज्ञायते। कुतः? 'वेत्थे'ति 'इति त्वि'ति च प्रवहणकृत प्रश्नपरिहाराभ्याम् ॥

२ ओं त्र्यात्मकत्वात्तु भूयस्त्वात् ओं ॥२॥

जीवः सर्वभूतपरिष्वक्त एव गच्छति। नाद्भिरेव। "आपः पुरुषवचसो भवन्ति" इत्यत्र आप इति विशेषोक्तिस्तु अपां तेजोऽबन्नरूप त्र्यात्मकत्वात् तेष्वपां भूयस्त्वात् (बाहुल्यात्) युज्यते ॥

३ ओं प्राणगतेश्च ओं ॥३॥

"यत्र वाव भूतानी"ति श्रुत्या भूताविनाभूत प्राणानां "करणैर्वावनवियुज्यत" इति श्रुतौ जीवेन सह गतेश्च (गमनश्रवणाच्च) गच्छन्त्येव भूतानि सह जीवेन ॥

४ ओं अग्न्यादिगतिश्रुतेरितिचेन्न भाक्तत्वात् ओं ४

"यत्रे"त्यादौ प्राणानां अग्न्यादिगतिश्रुतेः न जीवेन सहगमनं इति चेत् न। कुतः? भाक्तत्वात् ('अत्रे'ति श्रुतेः प्राणभागविषयत्वात्) भूतानामपि तैरेवगतिर्ज्ञेया ॥

५ ओं प्रथमेऽश्रवणादितिचेन्नताएव ह्युपपत्तेः ओं॥५॥

"एतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती"ति प्रथमे अग्नौ ब्याख्ये श्रद्धायुक्तजीवहोम श्रवणात्। प्रथमे (उपक्रमे) जीवस्य भूतसाहित्य अश्रवणात्। न भूतैः परिष्वक्तो रंहति जीव इति चेत् न। कुतः? हि ता एव (प्रस्तुता आप एव) उपक्रमगतश्रद्धाशब्देनोच्यन्ते। तत्कुत इतिचेत् 'आपःपुरुषवचसो भवन्ती'ति उपसंहारस्य उपपत्तेः ॥

६ ओं अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ओं ॥६॥

जीवेन सह भूतगतेः प्रत्यक्षतः अश्रुतत्वात् न तेषां सहगमनं इति चेत् न। कुतः ? 'अथैनमि'ति श्रुत्या इष्टादिकारिणां (यागहोमकृतां) प्रतीतेः (प्रत्यक्षत एव भूतवियोगसहयोगयोरवगमात् ॥

७ ओं भाक्तं वाऽनात्मवित्त्वात्तथाहि दर्शयति ओं ॥७॥

"अपामसोमममृता अभूमे"त्यादिश्रुतौ काम्यकर्मिणामुक्तममृतत्त्वं भाक्तं (अमुख्यं) कुतः ? अनात्मवित्वात् (अब्रह्मज्ञानित्वात् ।) वा शब्देन जिज्ञासुज्ञानिकृत अकाम्यकर्मजन्य अमृतत्वमपि न संसारनिवृत्तिरूपमुख्यामृतत्वं । किन्तु । क्रमेण अन्तःकरणशुद्धिपरंपरासाधनरूपं अथवा आनन्दातिशयरूपमोक्षैकदेशपरं अमुख्यं । कुत एतत् ? हि 'अमृतोवे'ति 'स एनमि'ति 'कर्मणे'ति च श्रुतिः तथा दर्शयति ॥

८ ओं कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्याम् ओं ॥८॥

कृतस्य कर्मणः स्वर्गादौ भोगेन अत्यये (क्षयेसति) पुनः अनुशयवान् (भुक्तकर्मशेषवानेव) इमं लोकं प्रत्यागच्छतीति ज्ञायते । कुतः ? दृष्टस्मृतिभ्यां ("ततः शेषेणे"ति श्रुति "भुक्तशेषे"ति स्मृतिभ्याम् ।)

९ ओं यथेतमनेवञ्च ओं ॥९॥

जीवेन यथा (येन मार्गेण) स्वर्गादिकं इतं (प्राप्तं) तथा तेन अनेवंच (अन्येन मार्गेण च) जीवः इमं लोकमागच्छति ॥

१० ओं चरणादितिचेन्न तदुपलक्षणार्थेति कार्ष्णाजनिः ओं ॥१०॥

गतागतं न यज्ञादेर्भवति किन्तु चरणात् (यज्ञाङ्गभूताचारादेव) 'चरणाचार'इति श्रुतेः इति चेत् न कुतः ? श्रुतिः तदुपलक्षणार्था (अजहल्लक्षणया यज्ञाचारोभयप्रतिपादिका) इति कार्ष्णाजनि राचार्यो मन्यते ॥

ओं आनर्थक्यमितिचेन्न तदपेक्षत्वात् ओं ॥ ११ ॥

'रमणीयचरणा' इत्यादि श्रुतेर्यज्ञाद्युपलक्षणार्थत्वे चरणशब्दस्य आनर्थक्यं। कुतः ? रमणीयकपूयपदाभ्यामेव कर्मोपलक्षणसंभवात् । इति चेत् न । कुतः ? **तस्य** साध्वसाधुयज्ञादिमत्वस्य **तदपेक्षत्त्वात्** (आचारादि सापेक्षत्त्वात्) तद्बोधार्थं चरणशब्दसार्थक्यं संभवति ॥

ओं सुकृतदुष्कृते एवेति तु बादरिः ओं ॥ १२ ॥

'धर्मं चर माऽधर्ममि'त्यादिप्रयोगात् **सुकृतदुष्कृते एव** चरणशब्दोदिते । न तु तदंगं ततोऽन्ये । **इति बादरिः** मन्यते । **तु** स्वसिद्धन्तोऽपि स एव ॥

११ ओं अनिष्टादिकारिणामपि च श्रुतम् ओं ॥ १३ ॥

न केवलं इष्टादिकारिणामेव गतागतं । किं नाम । **अनिष्टादिकारिणामपि** (इष्टाद्यकारिणां तद्विरुद्धपापकारिणामपि) अस्ति इति 'तद्य इहेति' श्रुतौ **श्रुतम्** । **च** शब्दो दुःखान्तरसमुच्चये ॥

ओं संयमनेत्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ओं ॥ १४ ॥

संयमने (नरके) सम्यग्यमशासनम् । **अनुभूयतु** (एव) स्थितानां **इतरेषां** (इष्टादिकारिभ्योऽन्येषां) मध्ये **आरोहावरोहौ** (केषांचित्) **आरोहः** (नरकादुत्थानं) केषांचित् **अवरोहः** (ततोऽपि नीचस्थाने । नित्यनरके । पातो) भवति । कुतः ? तेषां **तद्गतेः** (एवंविधगतेः) 'सर्वे' त्यादिश्रुतौ **दर्शनात्** (उक्तत्वात्) ॥

ओं स्मरन्ति च ओं ॥ १५ ॥

स्मृतिकर्तारः उक्तमर्थं 'गच्छन्ती'त्यादिभिः **स्मरन्ति च** ॥

१२ ओं अपि सप्त ओं ॥ १६ ॥

'रौरवोऽथ महांश्चे'त्यादिस्मृतिकर्तारः संयमनं (नरकं) **सप्तापि** (सप्तप्रभेदमपि) **स्मरन्ति** ॥

१३ ओं तत्रापि च तद्व्यापारादविरोधः ओं ॥ १७ ॥

तत्रापि (नरकेऽपि) च (दुःखाभोगेनैव) तत् (तस्य ईश्वरस्य) प्रेरणाख्य व्यापारात् अविरोधः ('सर्वं रमयति सर्वं न रमयति') इति सर्वनियन्तृत्वश्रुतिविरोधो वा नरकस्य सदुःखत्वे तन्नियन्तुरीशस्य दुःखाभोक्तृत्व विरोधो वा न । अतो भवत्येव नरकं सदुःखम् ॥

१४ ओं विद्याकर्मणोरितितु प्रकृतत्वात् ओं ॥ १८ ॥

'एतयोः पथोर्नैकतरेण' चेति श्रुतौ 'एतयो'रित्यस्य विद्याकर्मणोरिति तु (एव) अर्थः । न तु देवयानपितृयानयोरिति । कुतः ? 'तद्य इत्थं विदु'रिति श्रुतौ विद्याकर्मरूपमार्गयोरपि प्रकृतत्वात् । अतो भूतानां न गति स्वातन्त्र्यं । किन्तु साधन एव ॥

१५ ओं न तृतीये तथोपलब्धेः ओं ॥ १९ ॥

'तिर्यग्यातनातम'इत्युक्त अधोगतिषु तृतीये (अन्धंतमसि) न सुखं । कुतः ? 'अथाविद्वा'नित्यादिश्रुतौ तथा उपलब्धेः (प्रतीतेः) ॥

ओं स्मर्यतेऽपिच लोके ओं ॥ २० ॥

'न तृतीये सुख'मित्येतत् 'तिर्यक्षुनरकेचैव' 'नान्धेतम'सीत्यादौ स्मर्यते । लोकेऽपि सिद्धं (लौकिकदृष्टांतयुक्तयुक्तिसिद्धम्) 'अतिप्रिये यथाराजे'ति युक्तिमूलस्मृतौ स्मर्यते च ॥

ओं दर्शनाच्च ओं ॥ २१ ॥

'न तृतीये सुख'मित्येतत् 'नारायणप्रसादेने'त्यादि चतुर्मुख दर्शन वचनाच्च सिद्धम् ॥

ओं तृतीये शब्दावरोधः संशोकजस्य ओं ॥ २२ ॥

तृतीये (तमसि) तत्रापि तृतीये (अन्धे तमसि) यः शब्दः तेन संशोकजस्य (सम्यक् शोकजस्य मोहस्य) अवरोधः (प्राप्तिः) भवति । अतो न तत्र सुखलेशः ॥

ओं स्मरणाच्च ओं ॥ २३ ॥

'महातम'इत्यादिस्मृत्या तमस्त्रैविध्यस्य तृतीयतमसः श्रवणे श्रोतृमोहप्राप्तिश्च **स्मरणात्** । एतदुभयं सिद्धम् ॥

१६ ओं तत्स्वाभाव्यापत्तिरुपपत्तेः ओं ॥२४॥

'धूमो भूत्वे'त्यादौ कर्मिणः **तत्** (तस्य धूमादिदेवस्य) **स्वाभाव्य** (स्वं-भावसदृशस्वभावत्व) **आपत्तिः** (प्राप्तिरेव) न तदैक्यं तत्पदप्राप्तिर्वा । कुतः ? **उपपत्तेः** अन्यस्यान्यभावाद्दृष्ट्या अस्यैवार्थस्य उपपत्तेः ॥

१७ ओं नातिचिरेण विशेषात् ओं ॥२५॥

कर्मी **नातिचिरेण** (अचिरेणैव) योनिं प्राप्नोति । कुतः ? 'तद्य इह रमणीयचरणा अभ्याशोहयत्ते रमणीयां योनिमापद्यन्त' इति **विशेषात्** ॥

१८ ओं अन्याधिष्ठिते पूर्ववदभिलापात् ओं ॥२६॥

कर्मिणः 'त इह व्रीहियवास्तिलामाषा इति जायन्त'इत्युक्तव्रीह्यादिभावो-नाम **अन्याधिष्ठिते** व्रीह्यादिदेहप्रवेश एव । न तु तदभिमानित्वं । 'ते व्रीहि-यवा'इत्यैक्योक्तिस्तु **पूर्ववत्** ('धूमो भूत्वे'ति पूर्वोक्तिर्यथातथा) कुतः ? 'सोऽवाग्गत' इत्यादि श्रुतौ **अभिलापात्** ॥

ओं अशुद्धमितिचेन्न शब्दात् ओं ॥२७॥

यज्ञाख्यं कर्म **अशुद्धं** (दुःखसाधनं) हिंसात्वात् । द्विजहिंसावत् । अतो दुःखञ्च कर्मिणः भवतु **इति चेत् न** । कुतः ? 'वायव्यं श्वेतमालभेत'इत्यादि **शब्दात्** (शब्दविहितत्वात्) ॥

१९ ओं रेतस्सिग्योगोऽथ ओं ॥२८॥

कर्मिणः **रेतस्सिग्योगः** (पितृप्रवेशः) **अथ** (ततः पश्चात्) मातृयोगः । न तु प्रथमे एव ॥

२० ओं योनेः शरीरम् ओं ॥२९॥

कर्मी पितृक्रमेण **योनेः** प्रवेशानन्तरं **शरीरं** लभते ॥

॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥

———०———

॥ अथ तृतीयाध्यायस्य द्वितीयः पादः ॥

१ ओं सन्ध्येसृष्टिराह हि ओं ॥ १ ॥

हि 'अथ रथानि'ति श्रुतिः (जाग्रत्सुषुप्तिसन्धौ भवतीति) सन्ध्ये (स्वप्ने) भगवतः सृष्टिः आह। अतः सृष्टिः (स्वप्नपदार्थसृष्टिः) भगवत एव जायते ॥

ओं निर्मातारं चैके पुत्रादयश्च ओं ॥ २ ॥

एके शाखिनः सन्ध्येऽर्थानां निर्मातारंच 'कामंकामं पुरुषो निर्ममाणः' इत्याहुः । पुत्रादयश्च 'एतस्माद्ध्येव पुत्रो जायते' इत्यादिना सन्ध्ये पुत्रादयश्चेशेन सृज्यन्त इति एके आहुः । तस्माद्विष्णोरेव स्वाप्नसृष्टिः ॥

ओं मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ओं ॥ ३ ॥

सन्ध्यं (स्वप्नसंबध्यर्थजातं) माया शब्दितसंस्कारे (वासने) च्छाभ्यां मात्रन्तु (निर्मितमेव) अनादिमनोगतसंस्कारानुपादानीकृत्य ईशः स्वेच्छया निमित्तेन निर्मिमीते नान्येन। अतो न बाह्यकारणकं । कुतो मायामयत्वमित्यत उक्तं । कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । (बाह्यवत्सम्यगभिव्यक्तस्वरूपाभावात्) ॥

ओं सूचकश्च हि श्रुतेराचक्षतेच तद्विदः ओं ॥ ४ ॥

यतः संध्योऽर्थः शुभाशुभ सूचकः अतो नाऽसत्। कुतः ? 'यदा कर्मसु काम्येषु' इति पुरुषं कृष्णं कृष्णदन्तं पश्यति' इति च श्रुतेः । हि (प्रत्यक्षतः फलदर्शनाच्च) । किंच तद्विदः (सन्ध्यार्थविदो व्यासादयः) 'यद्वापि ब्राह्मणो ब्रूया'दित्यादिषु सन्ध्यजातस्य अर्थक्रियाकारित्वं आचक्षतेच ॥

२ ओं पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ओं ॥ ५ ॥

पराभिध्यानात्तु (ईशेच्छात एव) सन्ध्यं तिरोहितं (तिरोधीयते) न ज्ञानेन । कुतः ? हि अस्य (जीवस्य) बंधविपर्ययौ (बंधमोक्षौ) ततः (ईशात्) भवतः ॥

३ ओं देहयोगाद्वासोऽपि ओं ॥ ६ ॥

देहयोगात् देहाभिमानेन वासोऽपि स्थितिरपि (जाग्रदवस्थापि) पराभिध्यानादेव । न कालादितः ॥

४ ओं तदभावोनाडीषु तच्छ्रुतेरात्मनि ह ओं ॥७॥

जीवस्य तदभावः (प्रस्तुतजाग्रत्स्वप्नाभावः । सुप्तिरिति यावत्) नाडीष्वात्मनि (नाडीस्थ परमात्मनि) जायते । कुतः ? 'आसुतदानाडीष्वि'ति तत् (तस्य । नाडीस्थ आत्मास्थितत्वस्य श्रुतेः (श्रवणात्) । हि इति 'तन्नाडीसंस्थित'मित्यादि प्रसिद्धिद्योतकम् ॥

५ ओं अतः प्रबोधोऽस्मात् ओं ॥ ८ ॥

यतस्तस्मिन्सुप्तिः अतः सुप्तस्य जीवस्य प्रबोधोऽपि अस्मात् (परमात्मन) एव भवति ॥

६ ओं स एव च कर्मानुस्मृतिशब्दविधिभ्यः ओं ॥९॥

स एव (परमात्मैव) सर्वावस्था प्रवर्तकः । न देशकालान्तरे अन्यः । कुतः ? । कर्मानुस्मृतिशब्दविधिभ्यः । 'स एव साधु कर्म कारयति' इति कर्मणां ईशायत्तत्व श्रुतेः । 'प्रदर्शकस्तु सर्वेषां स्वप्नादे'रिति अभिमतार्थानुसारि स्मृतेः । 'एष स्वप्नान्दर्शयती'ति शब्दात् । 'आत्मानमेव लोकमुपासीते'ति विधेश्च ॥

७ ओं मुग्धेऽर्धसम्पत्तिः परिशेषात् ओं ॥ १० ॥

मुग्धे (मोहावस्थायां) परमेश्वरे अर्धसंपत्तिः (अर्धप्राप्ति) जीवस्य । न सम्यक्प्राप्तिः । कुतः परिशेषात् (परमात्मविदूरत्व सामीप्य प्रवेश अर्धप्रवेशेषु आद्यत्रिकस्य 'हृदयस्थात्पराज्जीव' इति स्मृत्या जाग्रदाद्यवस्थान्तरत्वेन अर्धप्रवेशस्यैव परिशेषात् ॥

८ ओं न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ओं ॥ ११ ॥

परस्य स्थानतोऽपि (सुरनरतिर्यगाद्यक्ष्यादि स्थानभेदेऽपि) उभयलिंगं (भिन्नरूपं) न। कुतः ? सर्वत्र हि (यतः सर्वस्थानेषु निर्दोषाशेषगुणो निर्भेदश्च परः "सर्वभूतेष्वेवमेवे"त्यादौ श्रूयते ॥

ओं न भेदादितिचेन्न प्रत्येकमतद्वचनात् ओं ॥ १२ ॥

"कार्यकारणबद्धा"विितिश्रुतौ भेदात् (स्वप्नजाग्रदनुभवजनकत्वरूपभेदकत्वधर्मश्रवणात्) विश्वादिरूपाणां न अभेद इति चेत् न। कुतः ? 'एषत आत्मे'त्यादिश्रुतिषु प्रत्येकं (परस्परं मूलरूपेण च) अतद्वचनात् (अभेदवचनात्) ॥

ओं अपि चैवमेके ओं ॥ १३ ॥

यतः एके शाखिनः एवं (अभेदं) च (अनन्तरूपत्वंच) 'अमात्रोऽनन्तमात्रश्चे'त्यादि श्रुतौ पठन्ति । अतः। अपि (अभेदेऽपि) भेदव्यपदेशः स्थानभेदात् युज्यते ॥

९ ओं अरूपवदेव हि तत्प्रधानत्वात् ओं ॥ १४ ॥

तत् (प्रस्तुतं ब्रह्म) अरूपवदेव (प्राकृतादिदेहरहितमेव) कुतः ? । तत्प्रधानत्वात् (प्रकृत्याद्युत्तमत्वात्) हि ('अस्थूल'मित्यादिश्रुतेश्च) अतो नानित्यम् ॥

ओं प्रकाशवच्चावैयर्थ्यम् ओं ॥ १५ ॥

प्रकाशवत् (यथा चक्षुरादिप्रकाशे विद्यमानेऽपि तस्य लौकिकप्रकाशविलक्षणत्वात् अप्रकाश इति व्यवहारः) तथा ब्रह्मणो रूपित्वेऽपि । विलक्षण रूपित्वात् "यदा पश्यः पश्यते रुग्मवर्ण"इत्यादिरूपित्व श्रुतेः अवैयर्थ्यं (न वैयर्थ्यम्) ।

ओं आह च तन्मात्रम् ओं ॥ १६ ॥

रूपं तन्मात्रं (ज्ञानानन्दादिमात्रं) 'ऐकात्म्यप्रत्ययसार' मित्यादि श्रुतिः आह च अतो न वैलक्षण्या निरुक्तिः) ॥

ओं दर्शयति चाथोऽपि स्मर्यते ओं ॥ १७ ॥

यतः 'तद्विज्ञानेने'त्यादि श्रुतिः आनन्दस्य ब्रह्मरूपत्वं च दर्शयति । अथोऽपि (ज्ञानस्यापि ब्रह्मरूपत्वं) "शुद्धस्फटिकसङ्काश"मिति स्मर्यते । अतो न ज्ञानानन्दयोर्ब्रह्मस्वरूपत्वमप्रामाणिकम् ॥

१० ओं अत एव चोपमासूर्यकादिवत् ओं ॥ १८ ॥

अत एव च (परमेश्वर तद्रूपाणां यस्मादेवं मिथो न कश्चिद्भेदः) अत एव च (चेतनत्व अंशत्व हेतोरेव) जीवस्य उपमा (मत्स्यादिसाम्यं= मत्स्यादेरिव ईश्वराभेदः) इति चेन्न । किन्तु सूर्यकादिवत् (यथा जलप्रतिबिंबित सूर्यकादेः सूर्यादिबिंबाद्भिन्नत्वं तथा जीवस्य प्रतिबिंबत्वाद्भिन्नत्वम् ।)

अथवा । अत एव च (मत्स्यादीनां ब्रह्मणो ज्ञानादिगुणैरविशेषोक्तेरेव ।) अत एव च (जीवस्य मत्स्यादितुल्यांशत्वे तदविशेषापत्तेरेव) सूर्यकादिवत् उपमा (ब्रह्मप्रतिबिंबता) अत एव सूर्यकादिवन्न बिंबाभिन्नत्वम् ॥

अथवा । अत एव च (प्रकृत तदधीनत्व तत्सदृशत्वाभ्यामेव) सूर्यकादिवत् उपमा (जीवस्य ईश्वरप्रतिबिंबता नतु उपाध्यधीनत्वादिना) ॥

११ ओं अंबुवदग्रहणात्तु न तथात्वम् ओं ॥ १९ ॥

यतः अंबुवत् (स्नेहेन) अग्रहणात् (माहात्म्यज्ञानाभावात्) । स्नेहसहित माहात्म्यज्ञानाभावात् । भक्ति विनेति यावत् । तथात्वं (सुखाद्यात्मकत्वरूप ईश्वरसादृश्यं) न तु सम्यक् व्यज्यते । अतो भक्तिः कर्तव्या ॥

१२ ओं वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ओं ॥ २० ॥

भक्तिज्ञानादेः वृद्धिह्रासभाक्त्वं (आधिक्यन्यूनता) साधकेषु विद्यते । कुतः ? । अन्तर्भावात् (महदल्पफलवतां ब्रह्मादीनां अन्येषां च भ-

क्तत्वेऽन्तर्भावात्) । एवं (भक्त्यादिविशेषाङ्गीकारादेव) उभयसामञ्ज-स्यात् (ईश्वरस्य ब्रह्मादीनन्यान् प्रतिमहदल्पफलदानसामञ्जस्यात् । सामञ्जस्य संभवात्)॥

ओं दर्शनाच्च ओं ॥ ॥ २१ ॥

"अथात" इति श्रुतौ "यथे" ति स्मृतौ च सुख तारतम्य दर्शनात् उक्तं युक्तम् ॥

१३ ओं प्रकृतैतावत्त्वं हि प्रतिषेधति ततो-ब्रवीति च भूयः ओं ॥ २२ ॥

हि (यतः) 'नैतावदि'ति श्रुतिः प्रकृतैतावत्त्वं (प्रकृतस्य सृष्ट्यादिकर्तृ-त्वस्यैतावत्वं सृष्टिसंहारकर्तृत्वमात्रं) प्रतिषेधति किञ्च ततो भूयः (सृष्ट्या-दिकर्तृत्वादधिकं) पालकत्वं ब्रवीति । च "सृष्टिंचे" ति स्मृतिस्तथा वक्ति । अतो पालकत्वरूपमाहिमान्तरमपि हरेरस्ति ॥

१४ ओं तदव्यक्तमाह हि ओं ॥ २३ ॥

तत् (ब्रह्म) स्वतः अव्यक्तं (पुरुषप्रयत्नेन द्रष्टुमशक्यं) कुतः ? हि "अव्यक्तञ्च निष्कलमि" ति श्रुतिः तथा आह तस्मात् । अतो परमात्मा-परोक्ष्यं तत्प्रसादाद्भक्तिसाध्यादेव भवति ॥

ओं अपि संराधने प्रत्यक्षानुमानाभ्याम् ओं ॥ २४ ॥

अपि (भक्तिरहिताराधनेनापि) न ब्रह्मव्यक्ती कर्तु शक्यं । कुतः ? सं-राधनेऽपि (सम्पूजनेऽपि) अव्यक्तत्वस्य ज्ञानिप्रत्यक्ष सूक्ष्मत्वहेतुक अनु-मानाभ्यां सिद्धत्वात् ॥

ओं प्रकाशवच्चावैशेष्यम् ओं ॥ २५ ॥

प्रकाशवत् (यथा अग्न्यादयः । तन्मात्रारूपेण अदृश्या अपि । स्थूल-रूपेण दृश्यन्ते) एवं ब्रह्मापीति चेन्न । कुतः ? यतः ब्रह्मणि अग्न्यादिवत् अविशेष्यं स्थूलसूक्ष्मत्व विशेषाभावः । अतः ॥

ओं प्रकाशश्च कर्मण्यभ्यासात् ओं ॥ २६ ॥

कर्मणि (कर्मकारके विषयीभूते तस्मिन् ब्रह्मणि) श्रवणादेः **अभ्यासात्** (अवर्तनात् । पौनः पुन्येन) **प्रकाशश्च** (अपरोक्षज्ञानं) भवति ॥

ओं अतोऽनंतेन तथा हि लिंगम् ओं ॥ २७ ॥

अतो (अव्यक्तत्वे प्रत्यक्षत्वेच प्रमाणसद्भावात् तदन्यथानुपपत्त्या) **अनन्तेन** (अपरिच्छिन्नेन शक्तेन ब्रह्मणा तत्प्रसादेन अव्यक्तस्यापि आपरोक्ष्यं भवतीति ज्ञायते । न केवलं अनुपपत्तिमात्रात्) किं तर्हि । **हि तथा लिंगं** ('तस्याभिध्यानादि'त्युक्तं ईशप्रसादस्य बन्धनिवृत्तिहेतुत्वरूपं प्रसादस्य दर्शनहेतुत्वज्ञापकं अस्ति) तस्मात् ॥

१५ ओं उभयव्यपदेशात्वहिकुण्डलवत् ओं ॥ २८ ॥

उभयस्य (गुणित्वस्य गुणात्मकस्य च) 'आनन्दं ब्रह्मण' 'आनन्दो ब्रह्म' इत्यादौ **व्यपदेशात्** ब्रह्मणः गुणात्मकत्वेऽपि गुणित्वं युज्यते । कथं? **अहिकुण्डलवत्** (अहिकुण्डलयोः तादात्म्येऽपि विशेषशक्त्या कुण्डलकुण्डलीभावो यथा तथा) ॥

ओं प्रकाशाश्रयवद्वा तेजस्त्वात् ओं ॥ २९ ॥

यद्वा **प्रकाशाश्रयवत्** (यथा आदित्यस्य प्रकाशात्मकत्वेऽपि प्रकाशित्वं विशेषबलात् । एवं गुणात्मकस्यापि ब्रह्मणो गुणित्वं विशेषबलात् युज्यते) ब्रह्मादित्ययोरुभयोरपि **तेजस्त्वात्** (तेजोरूपत्वा) तद्दृष्टांतग्रहणम् ।

ओं पूर्ववद्वा ओं ॥ ३० ॥

यद्वा यथैक एव कालः पूर्वेणाभिन्नोऽपि पूर्वकाल इति पूर्वपदेन विशिष्यते तथा ब्रह्म आनन्देनाभिन्नमपि आनन्दगुणित्वेन विशिष्यते ॥

ओं प्रतिषेधाच्च ओं ॥ ३१ ॥

"एकमेवाद्वितीयं" 'नेहनानास्ति किंचने'ति ब्रह्मणस्तद्गुणानांच भेदस्य **प्रतिषेधाच्च** ब्रह्म गुणात्मकम् ॥

१६ ओं परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ओं ॥ ३२ ॥

ब्रह्मणो आनन्दादिकं अतः (लौकिकानन्दादेः) परं (विलक्षणमेव) कुतः ? "एष सेतु"रिति सेतुत्वस्य "यतो वाचे"ति उन्मानत्वस्य "एतस्यैवे"ति बिंबप्रतिबिंबभाव संबन्धस्य 'अन्यदि'ति भेदस्य च व्यपदेशेभ्यः ॥

ओं दर्शनात् ओं ॥ ३३ ॥

अन्यानन्दादीनां दर्शनात् (मनोवाग्गोचरत्वात्) ब्रह्मानन्दादीनां अतथात्वात् तस्य लोकविलक्षणत्वम् ॥

ओं बुद्ध्यर्थः पादवत् ओं ॥ ३४ ॥

("पादोऽस्य विश्वाभूतानी"ति जीवेश्वरसंबन्धज्ञापनार्थं) पादवत् यथा लोकपादविलक्षणेषु भूतेषु पादपदप्रयोगः । तथा अलौकिकेष्वानन्दादिपदप्रयोगः । बुद्ध्यर्थः (अनुकूलवेद्यत्वादि ज्ञापनार्थः) ॥

१७ ओं स्थानविशेषात् प्रकाशादिवत् ओं ॥३५॥

प्रकाशादिवत् (यथा सूर्यादिप्रतिबिंबे) सूर्यकान्तादि स्थानविशेषात् (स्थानगुणात् अग्निजनकत्वादिवैचित्र्यं) तद्वत् । ब्रह्मादिस्थानगत अनादिभक्त्यादिविशेषात् प्रतिबिंबे वैचित्र्यसंभवेन । ब्रह्माद्यानन्दादिकं ईशानन्दादिप्रतिबिम्बम् ॥

ओं उपपत्तेश्च ओं ॥ ३६ ॥

बिंबभूत ईशसामर्थ्याच्च ब्रह्माद्यानन्दादौ वैचित्र्यस्य उपपत्तेः तत्प्रबिंबमन्यानन्दादिकम् ॥

१८ ओं तथान्यत्प्रतिषेधात् ओं ॥ ३७ ॥

यथा जीवानन्दादेरल्पत्वादिहेतोः ततोऽन्यत् ब्रह्मानन्दादि । तथा उपासाकृतस्य दुर्लक्षणत्वादिहेतोः ध्यानप्रतीतात् ब्रह्म अन्यत् । कुतः ? "तदेवे"त्यादिश्रुत्या ध्यानप्रतीतस्य ब्रह्मत्व प्रतिषेधात् ॥

१९ ओं अनेन सर्वगतत्वमायामयशब्दादिभ्यः ओं॥३८

अनेन (प्रकृत ईशेनैव) सर्वसृष्ट्यादि। न देशान्तरादावन्येन। कुतः? "एष सर्व एष सर्वगत" इति सर्वगतत्व श्रवणात्। 'सर्वत्र सर्वमेतस्मा'दिति मायामयशब्दव्याख्याश्रुतेः। आदिभ्यः (अन्यत्र प्रमाणाभावाच्च)॥

२० ओं फलमत उपपत्तेः ओं ॥३९॥

अतः (ईश्वरादेव) फलं भवति। न कर्मतः। कुतः? न ह्यचेतनस्य स्वतःप्रवृत्तिः किन्तु चेतनस्यैवेश्वरस्येति उपपत्तेः॥

ओं श्रुतत्वाच्च ओं ॥४०॥

"विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं" इति श्रुतत्वाच्च। ईश्वरस्यैव फलदातृत्वम्॥

ओं धर्मं जैमिनिरत एव ओं ॥४१॥

जैमिनिः आचार्यः धर्मं (शुभाशुभरूपकर्म) फलप्रदमाह। तंच धर्मं। अत एव (ईश्वरादेव) जन्यं मन्यते। कुतः? अत एव ("एष ह्येवे"ति श्रुतेः॥)

ओं पूर्वन्तु बादरायणो हेतुव्यपदेशात् ओं॥४२॥

पूर्वोक्तं ब्रह्म धर्मञ्च फलहेतुं बादरायणो मन्यते। तु (ब्रह्म कर्तृत्वेन धर्मं कारणत्वेन। न तु साम्येन) कुतः? "पुण्येन पुण्यं लोकं नयति" इति ब्रह्म कर्मणोः कर्तृत्वकारणत्वरूप हेतुव्यपदेशात्॥

॥ इति तृतीयाध्यायस्य द्वितीयः पादः॥

—o—

॥ अथ तृतीयाध्यायस्य तृतीयः पादः॥

ओं सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ओं ॥१॥

पूर्वसूत्रे पूर्वपदोदितं ब्रह्म सर्ववेदान्तप्रत्ययं (यथा शक्तिसर्ववेदविषयकश्रवणाद्युत्पन्नज्ञानविषयः। कुतः? चोदनाद्यविशेषात् 'आत्मेत्येवो-

पासीते'त्यादि विधीनां आदिपदोदितानां 'अत्र ह्येते'त्यादिवाक्योक्तयुक्तीनां-च सर्वाधिकारि साधारण्यात् ॥

अथवा । सर्ववेदान्तप्रत्ययं (सर्ववेदनिर्णयोत्पाद्यज्ञानं) ब्रह्म । कुतः ? चोदनादि ('आत्मेत्येवोपासीते'त्यादि विधीनां तदुक्तयुक्तीनां) अविशेषात् (अधिकारिभेदेन अविशिष्टत्वात् ॥

ओं भेदान्नेति चेदेकस्यामपि ओं ॥ २ ॥

'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि प्रतिशाखमुक्तिभेदात् । सर्वशाखाः एकाधिकारिविषयाः न इतिचेत् न । कुतः ? एकस्यामपि शाखायां 'आत्मेत्येवोपासीत' 'कं ब्रह्म खं ब्रह्मे'त्यादि भेददर्शनात् । एकशाखोक्तमपि न ज्ञेयं स्यात् । तत्र धर्म्यनुवादेनान्योन्यधर्मविधानादस्त्वैक्यमिति परिहारे सर्वशाखास्वपि तथा स्यात् ॥

ओं स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ओं ॥ ३ ॥

स्वाध्यायस्य ('स्वाध्यायोऽध्येतव्य'इति स्वाध्यायाध्ययनविधेः) तथात्वेन (सर्वाधिकारिसाधारण्येन) हीति सूचितायाः 'वेदःकृत्स्नोधिगन्तव्य' इति स्मृतेश्च । समाचारे (सर्ववेदोक्तकर्मणः सम्यगनुष्ठाने) सर्वेषां आधिकाराच्च । एकैकेनापि सर्वशाखाध्ययनेन ब्रह्म ज्ञातव्यम् ॥

ओं सलिलवच्च तन्नियमः ओं ॥ ४ ॥

तन्नियमः (सर्ववेदान्तप्रत्ययं ब्रह्मेत्येवं नियमः । सर्ववेदोक्तप्रकारेण ध्यानेन ब्रह्म ज्ञातव्यमिति नियमः)। सलिलवत् सलिलानां समुद्रप्राप्तिनियमवत् । यथा सर्वेषां सलिलानां प्रतिबन्धाभावमपेक्ष्यैव समुद्रैकाश्रयत्व नियमः) तथात्रापि पुरुषशक्तिमपेक्ष्यैव । सर्ववेदोक्तप्रकारध्यानेन ब्रह्मज्ञातव्यमिति नियमः ॥

ओं दर्शयति च ओं ॥ ५ ॥

यतः 'सर्वैश्च वेदैः परमो हि देवो जिज्ञास्य' इति श्रुतिः दर्शयति उक्तं अर्थम् । 'सर्वान् वेदान् सेतिहासान्' इति स्मृतिश्च । अतो सर्ववेदान्तप्रत्ययं ब्रह्म ॥

२ ओं उपसंहारोर्थाभेदाद्विधिशेषवत्समानेच ओं ॥ ६ ॥

विधिशेषवत् (विधिविहितस्येव । यथा विधिविहितत्वात्सन्ध्यावन्दनादिकं अवश्यं कर्तव्यम् । तथा) **अर्थाभेदात्** (सर्ववेदार्थभूतान् आनन्दादिगुणान् । अपहतपाप्मत्वादिदोषाभावांश्च अविभज्य) **उपसंहारः** (सर्वगुणानामप्येकबुद्ध्यारोहणरूपोपसंहारः) 'उपास्य एक'इति श्रुतौ विहितत्वात्कर्तव्यः । सोऽपि **समाने च** (समानविषय एव । ये ब्रह्मणि योग्याः पूर्णत्वाविरोधिनो गुणाः तद्विषय एव) न त्वयोग्यरोदनादौ । तथा सत्यनर्थप्राप्तेः ॥

ओं अन्यथात्वं च शब्दादिति चेन्नाविशेषात् ॥ ७ ॥

'आत्मेत्येवोपासीते'ति **शब्दात्** सर्वगुणोपसंहारस्य **अन्यथात्वं** (तस्य अकर्तव्यत्वं) **इति चेत् न** । कुतः ? एते गुणा नोपास्या इति **अविशेषात्** (विशेषवचनाभावात्) । 'सर्वैर्गुणैरि'त्यविशेषेणोपसंहारेतु विशेषप्रमाणसद्भावाच्च ॥

ओं नवा प्रकरणभेदात्परोवरीयस्त्वादिवत् ओं ॥८॥

परोवरीयस्त्वादिवत् (यथा परोवरीयस्त्वादिविद्यया 'स एष परो वरीयानुद्गीथः' इत्युक्तानां निरवधिकसर्वोत्तमत्वरूप परोवरीयस्त्वादिगुणानामेवोपासनम् । न तु सर्वगुणानामुपसंहारः) कुतः ? **प्रकरणभेदात्** (परोवरीयो वैश्वानरादिप्रकरणभेदात् । अन्यथा प्रकरणानि नाभिद्येरन् इति कृत्वेतियावत्) तद्वत् **नवा** (सर्वगुणोपसंहारो न कर्तव्यो वा) ॥

अथवा । **नवा** सर्वगुणोपसंहारः कर्तव्यः । कुतः ? । परोवरीयो वैश्वानरादि **प्रकरणभेदात्** । **परोवरीयस्त्वादिकं** यथा तावन्मात्रमुपास्यमुक्तं । तद्वत् । तत्तद्विद्योक्तमात्रमुपास्यम् । न तु सर्वगुणानुपसंहृत्य ॥

ओं संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ओं ॥ ९ ॥

'सोऽहं नामविदेवे'ति श्रुत्या सर्वविद्यानां **संज्ञात:** (संज्ञात्वत: । ईशनामत्वत: । तद्गुणवांचित्वात्तस्य ध्यानार्थत्वात्) । उपसंहार: कार्य इति चेत्तदुक्तं । (उपसंहारकर्तव्यत्वं उक्तं) अस्माभि: (इष्टमेवैतदस्माकं इति भाव:) । **अस्ति तु तदपि** ('नाम वा एता ब्रह्मण: सर्वविद्या' इति श्रुतिरूपप्रमाणमस्त्येव) न केवलं नामत्वयुक्तिमात्रम् ॥

३ ओं प्राप्तेश्च समञ्जसम् ओं ॥ १० ॥

प्रकृतं उपसंहारानुपसंहारकर्तव्यत्वं **समञ्जसं** (वक्तुं युक्तं) च (न केवलं कर्तव्यत्वं) कुत: ? **प्राप्तेः** (योग्यताविशेषेण तयो: प्राप्तत्वात् । व्यवस्थितत्वात् । अविरोधप्राप्ते:) ॥

४ ओं सर्वाभेदादन्यत्रेमे ओं ॥ ११ ॥

सर्वाभेदात् (सर्वगुणयुक्तत्वेन) उपासनेन । **इमे** ब्रह्मादय: **अन्यत्र** (तदनुपसंहर्तृभ्योऽन्यत्र। तत्फलविलक्षणमहाफले) भवन्ति । तद्भाजो भवन्ति ॥

५ ओं आनन्दादय: प्रधानस्य ओं ॥ १२ ॥

प्रधानस्य (प्रधानफलस्य मोक्षस्यार्थे) सर्वेषां मुमुक्षूणां **आनन्दादय:** (आनन्दो । ज्ञानं । सच्छब्दोदित निर्दोषित्वं । आत्मपदोदित स्वामित्व मित्येते चत्वारोगुणा:) उपास्या एव । (निर्दोषज्ञानानन्दा: "तं यथेति" श्रुते: । स्वामित्वं तु तत्प्रीत्यर्थम् ॥)

६ ओं प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ-हि भेदे ओं ॥ १३ ॥

सर्वेषामधिकारिणां **प्रियशिरस्त्वाद्यप्राप्तिः** (' तस्य प्रियमेव शिर:' इत्यादिश्रुत्युक्तप्रियशिरस्त्वादिगुणोपासनायोग्यता नास्ति) किन्तु । केषां चिदेव । कुत: ? **हि भेदे** तेषां फलभेदे (फलतारतम्ये) हि (प्रसिद्धा 'नैवसर्वे'ति स्मृतिरस्ति) **हि भेदे** (यस्माच्च फलभेदसिद्ध्यर्थ) **उपचयापचयौ** (उपासने वृद्धिह्रासौ । तारतम्यमिति यावत्) अपेक्षितौ । तस्मात् ॥

७ ओं इतरेत्वर्थसामान्यात् ओं ॥१४॥

सर्वगुणेभ्यो आनन्दादिचतुर्भ्यश्च इतरे (मध्यमगुणाः) अर्थसामान्यात् (उपासनस्य स्वस्वप्राप्यफलसाम्यमपेक्ष्य) तु (देवादिभिरुपसंहर्तव्या एव) ॥

८ ओं आध्यानाय प्रयोजनाभावात् ओं ॥१५॥

सर्ववेदादिषु ईशस्य सर्वगुणोक्तिः आ (समन्तात्। सर्वगुणोपसंहारपूर्वक) ध्यानाय (ध्यानार्थं) भवेत् । कुतः ? प्रयोजनाभावात् (गुणोक्तेः उक्त-रूपध्यानादन्यप्रयोजनाभावात्) ॥

ओं आत्मशब्दाच्च ओं ॥१६॥

'आत्मेत्येवोपासीते'त्यादिश्रुतौ गुणान्तरव्यावृत्तिपूर्वकात्मत्वस्योपासना आत्मशब्दात् विहितत्वात् च (अनुपसंहारेऽपि प्रमाणमस्ति) अतो अधि-कारिभेदेन सर्वगुणोपसंहारश्च कर्तव्यः ॥

९ ओं आत्मगृहीतिरितरवदुत्तरात् ओं ॥१७॥

इतरवत् (यथा "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्मे"त्यादि वाक्येनैवानेकसत्यत्वाद्युक्तिस्तथा) आत्मगृहीतिः ('आत्मैवे' ति वाक्येऽपि आत्मशब्देन चतुर्णां गुणानां ग्रहणं संभवति) कुतः ? । 'अत्र ह्येत' इति उत्तरात् (उत्तरवाक्यात्) । अतो नचानन्दादय प्रधानस्येति चतुर्गुणोपास्त्यु-क्ति विरोधः ॥

१० ओं अन्वयादितिचेत्स्यादवधारणात् ओं ॥१८॥

आत्मशब्दे सर्वगुणानां अन्वयात् (तस्य सर्वगुणवाचित्वात्) तस्य अनुपसंहारमानत्वमयुक्तं इति चेत् सर्वगुणवाचित्वमात्मशब्दस्य स्यात् । तथापि नानुपपत्तिः । कुतः ?। अवधारणात् ("आत्मेत्येवे"त्यवधारणात्) आत्मशब्दो हि ब्रह्मादीन् प्रत्येव सर्वगुणान् वदति अन्यान् प्रति तु तत्त-द्योग्यानेवेति निर्णयोपपत्तेः ॥

११ ओं कार्याख्यानादपूर्वम् ओं ॥१९॥

गुणजातं अपूर्वं (अलौकिकं) उपसंहृत्य ध्येयम्। कुतः? कार्याख्यानात् (ध्यानकार्यस्य मोक्षस्य अलौकिकत्वोक्तेः)॥

१२ ओं समान एव श्चाभेदात् ओं ॥२०॥

एवश्च (एवमपि। ईशधर्माणां अपूर्वत्वेऽपि) समाने च (योग्यविषय एव) उपसंहारः कार्यः॥ न त्वयोग्ये। वाण्याश्च सर्वगुणेषु क्रियासामान्ये च योग्यत्वम्। न तु विरिञ्चिवत्तद्विशेषः। तर्हि त्रिविक्रमत्वादिध्यानं नस्यादित्यत उक्तं अभेदात् (नित्यविक्रान्त्यादि सामान्यक्रियास्वन्तर्भावात्)॥

ओं सम्बन्धादेवमन्यत्रापि ओं ॥२१॥

अन्यत्रापि (त्रिविक्रमत्वादिक्रियाविशेषेऽपि) एवं (सर्वदोपसंहारो युज्यते ब्रह्मणः) कुतः सम्बन्धात् (क्रियाणां ईश्वरेण तादात्म्यरूपसम्बन्धेन नित्यत्वात्)॥

१३ ओं नवा विशेषात् ओं ॥२२॥

नवा सर्वगुणानामात्मपदेन गृहीतिः। कुतः? अधिकारिणां योग्यताविशेषात्। (आत्मपदस्य सर्वगुणोक्तिशक्तावपि यस्याधिकारिणः यावन्तो गुणाः युगपद्भान्ति तेन तावन्तो ध्येया इति व्यवस्थितेः)॥

ओं दर्शयति च ओं ॥२३॥

"सर्वान् गुणान् आत्मशब्दोऽब्रवीति ब्रह्मादीनामितरेषां नचैवे"ति श्रुतिश्च नवा सर्वेषामात्मपदेन गृहीतिरित्यर्थं दर्शयति॥

१४ ओं संभृतिद्युव्याप्त्यपिचातः ओं ॥२४॥

संभृति (सम्यग्भरणं) द्युव्याप्ती (प्रकाशव्याप्ती) अपि देवादीनामेवोपसंहर्तव्ये। नान्येषाम्। कुतः? अतश्च (अत एव। योग्यताविशेषादेव)॥

१५ ओं पुरुषविद्यायामपि चेतरेषामनाम्नानात् ओं ।२५।

पुरुषविद्यायामपि (सर्वोत्तमत्वेन प्रतिज्ञातायां पुरुषसूक्ताख्यविद्यायामपि) इतरेषां (तत्रोक्तेभ्योऽन्येषांच गुणानां।) अनाम्नानात्। कर्तव्य एव सर्वविद्यागुणोपसंहारः॥

१६ ओं वेधाद्यर्थभेदात् ओं ॥२६॥

"तं प्रत्यञ्चमर्चिषा विध्य मर्मन् । अग्नेत्वचं यातुधानस्य भिन्धि पराशृणीहि" इति श्रुत वेधादि न सर्वोपास्यम् । कुतः ? अर्थभेदात् (फलभेदात् हिंसारूपविलक्षणफलकत्वात्) तत्र च यत्यादेरनधिकारात् ॥

१७ ओं हानौतूपायनशब्दशेषत्वात्कुशाऽच्छंदस्तुत्युपगानवत्तदुक्तम् ओं ॥२७॥

यतः हानौ (बन्धहानिरूपमुक्तौ) तदुक्तं ('एतत्सामे'तिश्रुत्या मुक्तानामुपासनमुक्तम्) अतो मोक्षेऽपि तेषामुपासनं अस्त्येव । किन्तु स्वेच्छयैव कुशाच्छन्दस्तुत्युपगानवदेव । न विधितः । कुतः ? उपायनशब्दशेषत्वात् (उपासनाविधीनां मोक्षवाक्यशेषत्वात्) "ब्रह्मविदाप्नोति पर"मिति श्रुत्या ज्ञानान्मोक्षमित्युक्तज्ञानप्राप्त्यर्थं प्रवृत्ता उपासनाविधयः मुक्तविषया न स्युरिति भावः ॥

ओं सांपराये तर्तव्याभावात्तथा ह्यन्ये ओं ॥२८॥

सांपराये (मोक्षे) तर्तव्यस्य (निरसनीयस्य अनिष्टस्य) अभावात् । कुतः ? हि अन्येशाखिनः 'तीर्णो हि तदा सर्वान् शोकानि'ति पठन्ति । तस्मात् । मुक्तस्योपासनं स्वेच्छयैवेत्यङ्गीकार्यम् ॥

१८ ओं छन्दत उभयाविरोधात् ओं ॥२९॥

मुक्तौ कर्मकरणं छन्दतः (स्वेच्छया कुर्वन्ति नवा कुर्वन्ति) कुतः ? उभयाविरोधात् (विधिप्रत्यवाययोरभावात्) ॥

ओं गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ओं ॥३०॥

हि उभयथा (विधिप्रत्यवाययोरभावेनैव) गतेः (ईशप्राप्तिरूपमुक्तेः । अर्थवत्वं (पुरुषार्थत्वं) तस्मात् विधिप्रत्यवाययोरभावः । अन्यथा (तयोर्भावे) मुक्तेः संसारसमत्वेन पुरुषार्थत्वरूप विरोधः स्यात् ॥

ओं उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ओं ॥३१॥

मुक्ताः कदाचित्कर्मकुर्वन्ति नवेत्येवं भावो तेषां उपपन्नः । कुतः? तल्लक्षणार्थस्य (परंपरया कर्मफलमोक्षस्य) उपलब्धेः (प्राप्तत्वात्) फलस्य च स्वप्राप्त्यनन्तरं स्वसाधननियम निवारणलक्षणत्वात् । कथं? लोकवत् (यथा लोके यागाङ्गं विष्णुक्रमणस्य नियमः न यागसंपूर्त्यनन्तरमप्यस्ति । किंतु । कदाचिदेव । तथा) ॥

१९ ओं अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्यां ओं । ॥३२॥

सर्वेषां ब्रह्मदर्शिनां मुक्तेः अनियमः (केषांचिदस्ति केषांचिन्नेति उपासनावन्मुक्तेः व्यवस्था नास्ति) । कुतः? सर्वेषामपि मोक्षे अविरोधात् ('सर्वेगुणा ब्रह्मणैवह्युपास्यानान्यै'रिति श्रुतिदिरोधवदिह तद्विरोधाभावात्) "न कश्चिद् ब्रह्मवित्स्नातिमनुभवती"ति शब्दात् । यथा केषांचिन्मोक्ष एवमन्येषामिति अनुमानाच्च ॥

२० ओं यावदधिकारमवस्थितिराधिकारिकाणाम् ओं । ॥३३॥

आधिकारिकाणां (योग्यतानुसार्युपासनशीलानां ब्रह्मादीनां) यावदधिकारं (स्वस्वाधिकारानुसारेणैव) अवस्थितिः (मुक्तौ अवस्थितिः । तारतम्येनावस्थानं । तेषामुपासनावत्तारतम्येनैव मुक्तौ फलमित्यर्थः) अतो मुक्तावानन्दतारतम्यभावात् अस्त्येवोपासनाधिकारे नियमः ॥

ओं अक्षरधियांत्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ओं । ॥३४॥

अक्षरधियां (ब्रह्मज्ञानिनां) तु (असमत्वेऽपि । तारतम्यत्वेऽपि) अविरोधः (परस्परविरोधो नास्ति) । कुतः? ब्रह्मधीत्वात् । किंच । सामान्यतद्भावाभ्यां (सामान्यात् । मत्सरादिदोषाभावे साम्यात्) । तद्भावात् तेभ्यो उत्तमेभ्यः तत् तस्य ब्रह्मज्ञानादिलक्षणोपकारस्य अन्येषामवराणां । भावात् । कथमेतत्? औपसदवत् (सच्छिष्यस्य यथा गुरावविरोधस्तथा)

कुतः ? तत् (असमत्वेऽपि दोषाभावादिना विरोधो नेत्येतत्) "नानाविधा जीवसङ्घा" इति श्रुतौ उक्तम् । अतः ॥

२१ ओं इयदामननात् ओं ॥ ३५ ॥

आधिकारिकाणां उपासकानां इयत् (छन्दोगश्रुत्युक्त प्राणावधित्वमेव) नतु प्राणादधिकोऽस्ति । कुतः? "प्राणोवावसर्वेभ्यो भूयान्न प्राणाद्भूया"निति श्रुतौ तथा आमननात् ॥

ओं अन्तराभूतग्रामवदितिचेत्तदुक्तम् ओं ॥ ३६ ॥

भूतग्रामवत् (यथा भूतग्रामे नाम वाङ्मनः सङ्कल्पचित्तध्यानविज्ञान-बलान्नातेज आकाशस्मराशाप्राणसमूहे एकस्मादिकोऽधिकोदृष्टः । तथाधिका-रित्वात्) प्राणः । अन्तरा (परमात्मानं श्रियंच विना) साधिकः स्यात् इति चेत् न । कुतः ?। तदुक्तं । तत् (तत्र प्राणाधिकाभावे) तत् (प्रमाणं) 'प्राणो-वावे'ति श्रुतौ उक्तम् । अतः । तर्हि नामादिभ्योऽप्यधिको न स्यादिति चेन्न । कुतः ? तत् (नामादिभ्यो वागादेरुत्तमत्वं) 'वाग्वावे'ति श्रुतौ उक्तम् ॥

ओं अन्यथा भेदानुपपत्तिरिति चेन्नो-पदेशवत् ओं ॥ ३७ ॥

अन्यथा (प्राणस्य सर्वोत्तमत्वे) परमात्मना भेदानुपपत्तिरिति चेन्न । कुतः ? । उपदेशवत् (श्रुत्युपदिष्टवत्) अन्येभ्यः प्राणस्योत्तमत्वस्य तस्माच्च विष्णोरुत्तमत्वस्य उपपत्तेः ॥

२२ ओं व्यतीहारो विशिंषंति हीतरवत् ओं ॥ ३८ ॥

युक्तं प्राणात्सत्यस्य विष्णोरुत्तमत्वं । तयोर्मध्ये प्रश्नप्रतिवचनयोरश्र-वणेऽपि । व्यतीहारः (अध्याहारः । कार्यः ।) कुतः ? हि इतरवत् (प्रश्नादिना नामादितो वागादिकमिव) 'तु' शब्देन प्राणात्सत्यं विशिंषंति (व्यावर्तयन्ति) [छन्दोगाः 'एष तु वा अतिवदति यः सत्येनातिवदती'ति प्रा-णवादिनः सकाशात्सत्यातिवादिनं 'तु' ना विशिंषन्ति । तेन प्राणात्सत्यान्य-त्वज्ञानात्तदन्यथानुपपत्त्या अध्याहारो ज्ञायते इत्यर्थः] ॥

२३ ओं सैवहि सत्यादयः ओं ॥ ३९ ॥

प्राणाद्विष्णोरेवोत्तमत्वं । नतु बहूनां । कुतः ? हि सत्यादयः (सत्य-विज्ञान मतिश्रद्धा निष्ठाकृतिसुखभूमाहमात्मानः प्राणादूर्ध्वमाम्नाताः) सैव (प्रकृत ईशाख्यापरदैवतैव) अतः ॥

२४ ओं कामादितरत्र तत्र चायतनादिभ्यःओं॥४०॥

कामात् (कामाधीनात्) कामात् (ईश्वरेच्छानुसारि स्वेच्छयैव) न कर्मतः। श्रीः तत्र ईशसमीपे मूलरूपेण स्थित्वा इतरत्र च (भूम्यादौ) अवतरति। कुतः ? आयतनादिभ्यः ('सर्वायतना सर्वकालसर्वेच्छे'ति सर्वमायतनं य-स्या इत्युत्पत्त्या सर्वगतत्वादि बोधकश्रुत्यादेः) अतो तस्या बद्धत्वाभावात् न श्रियोऽधिकारित्वं । अतोऽधिकारिणां प्राणावसानत्वमेव ॥

ओं आदरादलोपः ओं ॥ ४१ ॥

श्रियः अबद्धत्वेऽपि आदरात् (निरुपाधिक भक्तिविशेषात्) तस्या उ-पासना अलोपः (भवति) ॥

ओं उपस्थितेस्तद्वचनात् ओं । ॥ ४२ ॥

ईशस्य उप (समीपे) स्थितेः (अनादिकाले स्थितत्वात्) श्रियो नित्य-सम्बन्धित्वेनातिशायित तत्प्रसादान्नित्यमुक्तत्वं युज्यते । कुतः ? "द्वावेवे-तावि"ति तत् (नित्यसम्बन्धित्व) वचनात् ॥

२५ ओं तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्घ्य-प्रतिबन्धः फलम् ओं । ॥ ४३ ॥

तन्निर्धारणार्थनियमः (अयमेव वेदार्थो नान्य इति निश्चयः) श्रवणम-ननफलरूपं । तदपि । तद्दृष्टेः (ब्रह्मणो दर्शनात्) ध्यानसाध्यात् । पृथक् । अतस्तद्दृष्ट्यसिद्धेः दृष्ट्यर्थं ध्यानं कार्यं । तर्हि श्रवणमननाभ्यां किं प्रयोज-नमित्यत उक्तं । अप्रतिबन्धः फलं (तद्दृष्टेः सन्देहविपर्ययकृतप्रतिबन्धा-

भावः श्रवणमननयोः फलं) हि "श्रोतव्य" इत्यादि श्रुतौ श्रवणादि त्रयस्यापि विहितत्वात् । अतः कर्तव्यमेव समस्तोपासनम् ॥

२६ प्रदानवदेव हि तदुक्तम् ओं । ॥४४॥

तत् श्रवणादित्रयं **प्रदानवदेव** [प्रीतिपूर्वकत्वरूपप्रकृष्टदान (उपदेश) युक्तमेव] दृष्टाख्यफलवत् । न श्रवणादिमात्रं । कुतः ? । **तत्** (ज्ञानस्य गुरुप्रसादाधीनत्वं) "आचार्यवान् पुरुषो वेदे"ति श्रुतौ **उक्तं** । अतः ॥

२७ ओं लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ओं ॥४५॥

तत् (गुरुप्रसादपूर्वक प्रदानमात्रं) **बलीयः** (श्रवणादिस्वप्रयत्नादपि ज्ञानसाधने बलिष्टम्) कुतः ? **लिङ्गभूयस्त्वात्** (वृषभहंसजलवायसरूपेभ्यो वाय्वग्निवरुणेभ्यो श्रुतविद्येनापि सत्यकामेन गुरुप्रदानादिरूप लिङ्गबाहुल्य दर्शनात्) तथापि **तदपि** (श्रवणादिकमपि) कार्यम् । कुतः ? 'श्रोतव्य' इति श्रुतेः । हि शब्दः श्रुतिसूचकः ॥

२८ ओं पूर्वविकल्पः प्रकरणात्स्यात् क्रियामानसवत् ओं ॥४६॥

पूर्व (पूर्वेण । पूर्वगृहीतेन गुरुणा) पश्चात्प्राप्तगुरोः । **विकल्पः** (ग्राह्योनवेति विविधकल्पः)**स्यात्** (पूर्व त्यक्त्वा परः स्वीकार्यो नवेति विकलपस्स्यात्) नतु ग्राह्य एवेति विधिः । कुतः ? **प्रकरणात्** (प्रकृष्टानुग्रहमपेक्ष्य गुरोः स्वीकार्यत्वात्) कथं ? **क्रियामानसवत्** (यथा फलतः समयोर्ध्यानयोर्विकल्पस्तथा) (अत्र 'विकल्पेत्युक्त्या' 'विकल्पः समयोर्भवेत् इति' विकल्पः कामतो भवेत्' इति च स्मृतिः सूचिता । तेन पूर्वस्मादुत्तमश्चेत्परः ग्राह्य एव । न विकल्पः । समोऽपि पूर्वाज्ञयैव । अधमश्चेन्न ग्राह्य एवेति सूचितम् ॥)

ओं अतिदेशाच्च ओं ॥४७॥

"ब्रह्मोपास्वे" ति श्रुतौ पूर्वगुरुणा स्व समोत्तमगुरुस्वीकाराय **अतिदेशाच्च** समोत्तमौ ग्राह्यावेव ॥

२९ ओं विद्यैव तु निर्धारणात् ओं ॥४८॥

विद्यैव (ब्रह्मज्ञानमेव) मुक्तिसाधनं। न कर्म । कुतः ? "नान्यःपन्था" इति निर्धारणात् तु (अन्यनिषेधेन ज्ञानस्यैव मोक्षसाधनत्वनिश्चयादेव) ॥

ओं दर्शनाच्च ओं ॥४९॥

न विद्यामात्रात् किन्तु दर्शनाच्च (ब्रह्मसाक्षात्कारादपि) मुक्तिः । कुतः ? 'दृष्ट्वैव तं मुच्यत' इति दर्शनाच्च । अतो न ध्यानवैयर्थ्यं ॥

३० ओं श्रुत्यादिबलीयस्त्वाच्च न बाधः ओं ॥५०॥

ज्ञानस्यैव मुक्तिहेतुत्वेऽपि "कर्मणैवे" ति स्मृतिबाधो न। कुतः ? श्रुत्यादिबलीयस्त्वात् 'तमेव' मिति श्रुतिः । "इन्द्रोऽश्वमेधांच्छतमिष्ट्वे"ति श्रुत्युक्तं बहुकर्मकृतोऽपीन्द्रस्य दुःखामिश्रसुखरूपमोक्षार्थं तत्वज्ञानप्रार्थनरूपलिङ्गं । "नास्त्यकृतः कृतेने" त्युपपत्तिः । "कर्मणा बध्यते" त्युक्तियुक्तभगवद्वचनम् । इत्येतयोर्बलीयस्त्वात् । च शब्दस्य "कर्मणैवे" त्ययोगव्यवच्छेदः क्रियतेत्यर्थः ॥

३१ ओं अनुबंधादिभ्यः ओं ॥५१॥

श्रवणादिजन्यमपि ब्रह्मदर्शनं अनुबन्धादिभ्यः (हरिगुरुभक्तिशमदमादिभ्यो) भवति । न द्वेषादिना ॥

३२ ओं प्रज्ञांतरपृथक्त्ववद्दृष्टिश्च तदुक्तम् ओं ॥५२॥

प्रज्ञान्तरस्य (प्रज्ञाविशेषस्य अविच्छिन्नपरोक्षज्ञानसन्ततिरूपध्यानस्य) पृथक्त्ववत् (तारतम्यवत्) दृष्टिश्च (ब्रह्मदर्शनमपि) नानाप्रकारम् । न सर्वेषामेकविधम्। तत् (दर्शनतारतम्यं) "अन्तर्दृष्टयः" इत्यादिश्रुतौ उक्तं ॥

३३ ओं न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः ओं ॥५३॥

ब्रह्मरूपाणां सामान्यात् (समानत्वात्) उपलब्धेः सामान्यात् (भगवद्दर्शनस्य साधारण्यात्) यत्किञ्चिद्रूपदृष्ट्या अपि मुक्तिर्भवतीति न । किन्तु

स्वबिंबरूपदृष्ट्यैव । **मृत्युवत्** (यथा मृतिसामान्यान्न मुक्तिः । किन्तु मृत्युविशेषादनन्तरमेव । तथा) ॥ नचैवं सामान्यदर्शनस्य वैफल्यं यतस्तस्य महरादिलोकप्राप्तिसाधनत्वं अतः । नचैतावता तस्य मोक्षहेतुत्वं **हि लोकापत्तिः** मात्रं न मुक्तिः अतः ॥

३४ ओं परेणच शब्दस्य ताद्विध्यं भूयस्त्वादनुबंधः ओं ॥ ५४ ॥

परेणच (परमात्मनैव) दृष्ट्यादि । न भक्त्या स्वतन्त्रया । कुतः ? 'एतैरुपायैरि'त्यादिश्रुतेः । 'भक्तिरेवैन'मितिश्रुतौ भक्तिशब्दस्य **ताद्विध्यं** (स्वातन्त्र्येण दृष्ट्यादिहेतुत्वोक्तिः तस्याः करणत्वेन युक्ता।) कुतः ? **भूयस्त्वादनुबन्धः** (भक्तेः करणेषु प्रधानत्वात्) ।

यद्वा । **परेण** वाच्येन निमित्तेन **शब्दस्य** 'भक्तिरि'ति श्रुतेः **ताद्विध्यं** युक्तम् ॥

३५ ओं एक आत्मनः शरीरेभावात् ओं ॥५५॥

अंशोंशीति एक एव (अंशांशिनोरैक्यमेव अंशोंशीति पदयोरर्थः) कुतः ? **आत्मनो** अंशिनः (इन्द्रादेः) कर्मनिर्मित **शरीरे** अंशस्य (अर्जुनादेः) **भावात्** (तदभिमानतया वर्तमानत्वात्) ॥ अतो भगवद्दर्शनसाधनोपासनस्य अनादियोग्यताऽपेक्षितैव ॥

ओं व्यतिरेकस्तद्भावभावित्वान्नतूपलब्धिवत् ओं ॥५६॥

उपलब्धिवत् (ज्ञानसुखादौ परस्परं भेद इव) अंशांशिनोरपि **व्यतिरेको** (भेद)इति तु न कुतः ? **तद्भावभावित्वात्** (अंशस्य अंशीकृतउपासनाजन्यफलानुभावित्वात्) ॥

३६ ओं अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ओं ॥ ५७ ॥

अङ्गावबद्धाः (हरेरंगाश्रिताः) देवा अपि तत्परिवारत्वेन देवैरुपास्याः। तदुपसंहारे तु विशेषोऽस्ति । कः ? । देवानां **प्रतिवेदं** (सर्ववेदगतासु)

शाखासु उक्तं यदङ्गदेवतागुणजातं तत्सर्वं अवरेषु नोपसंहार्यम् । किन्तु । योग्यमेवेत्येवंरूपविशेषः । हि शब्दात् "समत्वा"दिति स्मृतिप्रसिद्धिः सूचिता ॥

ओं मंत्रादिवद्वाऽविरोधः ओं ॥ ५८ ॥

मन्त्रादिवत् (यथाग्न्याद्यधमदेवता वाचि मन्त्रविद्यानां) ब्रह्माद्युत्तम-देवतावाचित्वं तथा अविरोधो वा (अधमगुणानुत्तमेषु उपसंहारेऽपि विरोधो नास्तीति वाभ्युपगम्यते) ॥

३७ ओं भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ओं ॥ ५९ ॥

भूमगुणः सर्वैरुपास्यः । कुतः ? भूम्नः (भूमगुणस्य) ज्यायस्त्वं (सर्वगुणेषु प्राधान्यं) यतः ॥ ज्यायस्त्वं कुतः ? क्रतुवत् (दीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकः क्रतुः यथा विश्वजिदादि सर्वयागेषु अनुवृत्तत्वेन तत्तद्योग्यानुष्ठानफलहेतुत्वाज्ज्यायान् तद्वत्) । भूमगुणस्य तादृशफलहेतुत्वं कुतः ? "भूमैवे"ति श्रुतिः तथा च दर्शयति ॥

३८ ओं नानाशब्दादिभेदात् ओं ॥ ६० ॥

भूमगुणो नाना (सर्वैर्यथाधिकारं नानाप्रकारेणोपास्यः) कुतः ? शब्दादिभेदात् (शब्दानुमानप्रत्यक्षैर्भेदप्रतीति दर्शनात्) ॥

३९ ओं विकल्पो विशिष्टफलत्वात् ओं ॥ ६१ ॥

बिंबान्यनृसिंहोपासनस्य विकल्पो (कर्तव्यं नवेति विकल्पः । न तु न कार्यमेवेति नियमः) कुतः ? विशिष्टफलत्वात् (दुरितनिवृत्तिरूपफल-विशेषहेतुत्वात्) ॥

४० ओं काम्यास्तु यथाकामं समुच्चीयेरन्न-वा पूर्वहेत्वभावात् ओं ॥ ६२ ॥

काम्यास्तु (मोक्षान्यकामसाधनेशगुणास्तु) यथा कामं (वित्तादि-कामानुसारेण) समुच्चीयेरन्नवा (उपसंहार्या नवा) अमुमुक्षुभिरुपसंहार्याः ।

मुमुक्षुभिर्न । कुतः ? **पूर्वहेत्वभावात्** (मुमुक्षूणां मोक्षेच्छातः पूर्ववित्तादिकामाभावात्) यद्वा पूर्वसूत्रोक्तविशिष्टफलाख्यहेत्वभावात्

४१ ओं अङ्गेषु यथाश्रयभावः ओं ॥ ६३ ॥

अङ्गेषु (भगवदङ्गेषु) सूर्यादिदेवानां **यथाश्रयभावः** ('चक्षोः सूर्यो अजायते'त्यादा उक्तः तथा) ईशांगेषु उपास्तिः कार्या । अन्यथा अङ्गस्थिति श्रुतिवैय्यर्थ्यापत्तेः ॥

ओं शिष्टेश्च ओं ॥ ६४ ॥

यस्मिन्नित्यादिश्रुतौ तथा **शिष्टेश्च** (विधानाच्च) अङ्गेषु सूर्यादीनामुपास्तिः कार्या । न केवलं 'चक्षोरि'त्यादिवचनान्यथानुपपत्त्या ॥

ओं समाहारात् ओं ॥ ६५ ॥

समाहारात् (उपसंहारफलवचनात्) एतच्छ्रुतौ तथोपास्तेः परमस्थानावाप्ति फलत्वोक्तेः । तस्य च देवयोग्यत्वात् । देवैस्तथोपास्तिः कार्या ॥

ओं गुणसाधारण्यश्रुतेश्च ओं ॥ ६६ ॥

गुणानां (ईशगुणानां) **साधारण्यस्य** (उपास्यत्वेन सामान्यस्य) **श्रुतेश्च** ('साधारण्यात्सर्वगुणाः परस्य समाहार्या' इति श्रवणाच्च) सूर्याश्रयचक्षुष्ट्वादीनामपि ईशगुणत्वादेवमुपास्तिः कार्या ॥

४२ ओं नवाऽतत्सहभावश्रुतेः ओं ॥ ६७ ॥

नवा अङ्गेषु सूर्यादीनामुपास्तिः कार्या । कुतः ? **अतत्सहभावश्रुतेः** (सर्वशाखागतोपासनेन सह अङ्गदेवतोपासनस्य अश्रवणात्) देवान्यापेक्षया 'वा' शब्दः ॥

ओं दर्शनाच्च ओं ॥ ६८ ॥

"सत्यो ज्ञानः परमानन्दरूप आत्मेत्येवं नित्यदोपासनं स्यात् । नान्यत्किञ्चित्समुपासीतधीरः सर्वैर्गुणैर्देवगणा उपासते" इति **दर्शनाच्च** । देवैरेवांगदेवतोपास्तिः कार्या नान्यैः ॥

॥ इति तृतीयाध्यायस्य तृतीयः पादः ॥



॥ अथ तृतीयाध्यायस्य चतुर्थः पादः ॥

ओं पुरुषार्थोऽतः शब्दादिति बादरायणः ओं ॥ १ ॥

अतः (यस्य दर्शनस्यार्थे पूर्वमुपासनोक्ता तद्दर्शनतः) पुरुषार्थः (पुरुषैरर्थ्यमानं यावच्छुभं) तत्सर्वमाप्यत एव न तु मोक्षमात्रम् । कुतः ? 'यं यं लोक'मित्यादि शब्दादिति बादरायणो मन्यते ।

अथवा । अतः (ज्ञानात्) पुरुषार्थो भवति । कुतः ? शब्दात् ("यं यं लोकमि"त्यादि शब्दादिति बादरायणो मन्यते ॥

ओं शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ओं ॥ २ ॥

अस्य ज्ञानस्य 'यं यं' इति श्रुतौ पुरुषार्थवादः (स्वर्गादिमुक्त्यन्यपुमर्थहेतुत्ववादः) शेषत्वात् (तद्धेतुकर्मशेषत्वान्न साक्षात्) तर्हि ज्ञानस्य प्राधान्येन तद्वादः कथं । यथान्येषु 'स्वर्गं धनाद्देहतो वै ग्रहाच्च प्राप्स्यन्ती'ति श्रुतौ वित्तादिषु स्वर्गहेतुकर्मशेषेषु यथा तद्वादस्तथेति जैमिनिः मन्यते ॥

ओं आचारदर्शनात् ओं ॥ ३ ॥

ज्ञानिनां च देवादीनां आचारस्य (कर्मानुष्ठानस्य) ' यज्ञेन यज्ञमयजंत देवा' इत्यादौ दर्शनात् न ज्ञानादेव सर्वपुरुषार्थप्राप्तिः ॥

ओं तच्छ्रुतेः ओं ॥ ४ ॥

तत् (तस्य कर्मप्रति ज्ञाने शेषत्वस्य) 'यदेव विद्यया करोति' इति श्रुतेः (श्रवणात्) तच्छेषत्वम् ॥

ओं समन्वारम्भणात् ओं ॥ ५ ॥

"कर्मैवेदं दैविकं मानुषं वाप्यन्वारभेदि"ति श्रुत्या कर्मणैवैहिकामुष्मिकदेहादेः सं (प्राधान्येन) अन्वारंभणात् (उत्पादनोक्तेः) तस्यैव प्राधान्यं न ज्ञानशेषत्वं तत्साम्यं वा ॥

ओं तद्वतो विधानात् ओं ॥६॥

"ज्ञानी च कर्माणि सदोदितानि कुर्यादकामः" इति श्रुतौ तद्वतः (प्रस्तुतज्ञानवतः) कर्मविधानात् न लीलात्वम् ॥

ओं नियमाच्च ओं ॥७॥

"कुर्वन्नेवेह कर्माणि" इत्यादि श्रुत्या ज्ञानिनोऽपि कर्मणो नियमाच्च (नियमितत्वाच्च) अकरणे प्रत्यवायाच्च न लीलात्वम् ॥

ओं अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ओं ॥८॥

बादरायणस्य एवं (ज्ञानादेव पुरुषार्थो भवति इत्येवं मतम् । न तु ज्ञानं कर्म शेषतया तथेति) तर्हि ज्ञान्याचारवैयर्थ्यं प्रागुक्तविध्याद्ययोगश्चेति न शंक्यम् । कुतः ? अधिकोपदेशात् (ज्ञानार्जिते फले अधिकस्य कर्माधीन अतिशयस्य 'यथायथा कर्म कुरुते तथातथाधिको भवति' इति उपदेशात्) कर्मणो ज्ञानशेषत्वोक्तेः । तद्दर्शनात् (तस्य ज्ञानफले कर्मार्जितातिशयस्य राजसूयादिना युधिष्ठिरादीनां । दर्शनात् 'राजसूयार्जितानि'त्यादि भारतवाक्ये उक्तत्वात्) ॥

ओं तुल्यं तु दर्शनम् ओं ॥९॥

ज्ञानिनां दर्शनं तुल्यन्तु (ज्ञानं सममेव) कर्मणः कृतावकृतौच । अतो ज्ञानि कर्म न ज्ञानेऽतिशयकृत् । किन्तु ज्ञानफल (मोक्ष) एव ॥

२ ओं असार्वत्रकी ओं ॥१०॥

ज्ञानाधिकारिता असार्वत्रकी (न सर्वजनस्थिता) ॥

ओं विभागः शतवत् ओं ॥११॥

शतवत् (नवकोटीनां देवत्वसाम्येऽपि परापरब्रह्मद्यधिकस्य शतस्य सोमाधिकारो नान्येषामिति विभागो यथा) तथैवार्थित्वादिसाम्येऽपि केषांचिज्ज्ञानेऽधिकारिता अन्येषां नेति विभागः । अर्थित्वादिमात्रं न प्रयोजकं ॥

ओं अध्ययनमात्रवतः ओं   ॥ १२ ॥

यथाशक्ति सर्ववेदानां साङ्गसफल अध्ययनवतः ब्रह्मविद्याधिकारिताऽस्ति नान्येषाम् ॥

३ ओं नाविशेषात् ओं   ॥ १३ ॥

देवादीनां ज्ञानाधिकारिता अविशेषात् न (अविशेषेण। न एकरूपा न) कुतः ? अविशेषात् (ज्ञानस्याप्यविशेषप्रसङ्गात्)अधिकारानुसारित्वात्तस्य ॥

४ ओं स्तुतयेऽनुमतिर्वा ओं   ॥ १४ ॥

"स ब्राह्मणः केनस्याद्येनस्यात्तेनेदृश एवेति" श्रुतौ ज्ञानिनो यथेष्टाचरणं न विधिः । किन्तु स्तुतये (ज्ञानि स्तुत्यर्थम्) यथेष्टाचारेऽपि ज्ञानी मुच्यत एवेति सामर्थ्यप्रकटनायैवोच्यते । अनुमतिर्वा (ज्ञानिनां यथेष्टाचारे अभ्यनुज्ञामात्रं वा) अतो ज्ञानिनः सदसत्प्रवृत्त्योर्विशेषो अस्त्येव ॥

ओं कामकारेण चैके ओं   ॥ १५ ॥

यतः एके शाखिनः कामकारेण च यथेष्टाचारेणापि ज्ञानिनो मोक्षं "कामचाराः कामभक्षाः" इति श्रुतौ पठन्ति । अतो न ज्ञानिनः सदसत्प्रवृत्त्योर्मोक्षहानिः ॥ किन्तु फले विशेषमात्रमस्ति ॥

ओं उपमर्दं च ओं   ॥ १६ ॥

यदा ज्ञानिनः अनिवर्त्यतया प्राप्तप्रारब्धकर्मणोऽपि किञ्चिद्भुक्तस्य ज्ञानेन उपमर्दं (फलह्रासं) एके शाखिनः "ओमित्युच्चार्यं" तिश्रुतौ पठन्ति तदा ज्ञानोत्तरकालीना सत्कर्म न मोक्षप्रातिबन्धकमिति किं वर्णनीयम् ॥

ओं ऊर्ध्वरेतस्सु च शब्दे हि ओं   ॥ १७ ॥

ज्ञानिवत् जिज्ञासूनामपि असत्कर्म न मोक्षप्रतिबन्धकामिति न । कुतः ? हि यस्मात् ऊर्ध्वरेतस्सु च ऊर्ध्वरेतस्त्वादिगुणयुक्तेष्वेव 'य इमं परमं गुह्यं' इत्यादि शब्दे ज्ञानोपदेशविधिरस्ति । अतः (अपरोक्षदर्शनस्य परोक्षज्ञान पूर्वकत्वात्) ॥

ओं परामर्श जैमिनिरचोदनाचापवदति हि ओं ॥१८॥

जैमिनिः 'केनस्यादि' ति श्रुतेः 'प्रातरुत्थायेति' श्रुत्यन्तरोक्तसदाचार परामर्शं ब्रूते। तथा च श्रुत्यन्तरविहितसदाचारेष्वेव विधिबन्धेन विना स्वेच्छया नियमेन वर्तितव्यं । न तु कामाचारविधिः स्तुत्यादिर्वेति मन्यते । कुतः ? हि यस्मात् अचोदना (निषिद्धं ज्ञानिना कार्यमिति विधिर्नास्ति) 'ब्राह्मणो न हन्तव्य'इत्यपवदति च श्रुतिः । अतः ॥

ओं अनुष्ठेयं बादरायणः साम्यश्रुतेः ओं ॥१९॥

बादरायणः। अनुष्ठेयं (अनुष्ठेयमध्य एव स्वेच्छया केषां चिदनुष्ठानं केषांचिन्नेत्यनुष्ठेयकामचारानुमतिरेव 'येन स्यादि' ति श्रुतेरर्थः। नतु कामचारविधिरिति मन्यते) कुतः ? साम्यश्रुतेः (केनापि प्रकारेणापि प्रवृत्तावपि 'ईदृश एवे' ति ज्ञानिनः साम्योक्तेः) ॥

ओं विधिर्वा धारणवत् ओं ॥२०॥

धारणवत् (यथा वेदधारणं त्रैवर्णिकानामेव विहितं) नतु सर्वेषां । तथा विधिर्वा (ज्ञानिनामेव न त्वज्ञानिनां 'येनस्यादि'ति स्वेच्छाचारविधिर्वा)॥

ओं स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ओं ॥२१॥

'केनस्यादि'ति वाक्यं पूर्वोक्त स्तुतिमात्रं न स्वेच्छाचरणविधिः। कुतः? उपादानात् (ज्ञानिभिरपि 'सन्ध्यामुपासीते'त्यादि साधारणविधि स्वीकारा) दिति चेन्न। कुतः ? अपूर्वत्वात् (ज्ञानिनां परमात्माधीनत्वात्) 'केनस्या' दित्यस्य अविधित्वेन स्तुतित्वे ज्ञानिनां सर्वविध्यतिदूरत्वं स्यात् । तच्च परब्रह्मण एव योग्यं । न तदधीनज्ञानिनामपि युक्तम् ॥

ओं भावशब्दाच्च ओं ॥२२॥

न केवलं ज्ञानिनो अपूर्वत्वात् सर्वविध्यतिदूरत्वभिया 'केनस्यादि' ति श्रुतिः स्वेच्छाचारविधिः । किन्तु । 'यथाविधानमपरे विधिर्भावे प्रजापते' रिति श्रुताविच्छापरपर्याय भावशब्दाच्च (स्पष्टप्रमाणसिद्धत्वात्) ॥

ओं पारिप्लवार्था इति चेन्न विशेषितत्वात् ओं ॥२३॥

"केनस्यादि"त्यादिश्रुतयः **पारिप्लवार्था** (चञ्चलार्था अव्यवस्थितार्थाः स्युः) नियमेन सर्वधर्माचरणं तन्मध्ये कामचारेणाचरणं यथेष्टाचारविधिः इत्युक्तार्थत्रयस्य परस्परविरुद्धत्वा **दितिचेन्न** । कुतः? **विशेषितत्वात्** "त्रेधाज्ञानिन" इत्यादिश्रुत्या ज्ञानिनामनेक प्रकारत्वात्) ॥

ओं तथाचैकवाक्योपबन्धात् ओं । ॥२४॥

तथा च (ज्ञानिनां त्रैविध्येसति) **एकवाक्योपबन्धात्** ("केनस्यादि" त्यस्य त्र्यर्थत्वानुगुणानां "प्रातरुत्थाये"ति "यस्त्वात्मरति"रिति "यथाविधान"मिति च वाक्यानां **एकवाक्यत्वेन** ज्ञानिभेदमाश्रित्याविरोधेन **उपबन्धात्**) **तथा च** (तेषामविरोधेसति "केनस्यादि"ति वाक्यस्याप्येकवाक्यत्वोपबन्धात् न पारिप्लवार्थत्वं) ॥ अनेन जैमिनिमतं मानुषज्ञानिविषयं । बादरायणमतं देवताविषयं । "विधिर्वे"ति मतं हिरण्यगर्भ विषयं इत्युक्तं भवति ॥

ओं अत एव चाग्नींधनाद्यनपेक्षा ओं ॥२५॥

अत एव ("कामचाराः कामभक्षा"इति श्रुतौ कामचारेऽपि मोक्षनैयत्यस्योक्तत्वादेव) ज्ञानस्य मोक्षार्जने **अग्नींधनाद्यनपेक्षा** (अग्निहोत्राद्याश्रमवर्णधर्मापेक्षा नास्ति) **च** शब्दो "येषां ज्ञानं समुत्पन्नमि"त्यादि स्मृतिं समुच्चिनोति ॥

ओं सर्वापेक्षा च यज्ञादि श्रुतेरश्ववत् ओं ॥२६॥

सर्व धर्मा **पेक्षा च** ज्ञानस्योत्पत्तौ । न तु ज्ञानफलमोक्षेऽपि । कुतः? **यज्ञादिश्रुतेः** ("विविदिषंति यज्ञेने"त्यादि श्रुतेः) **अश्ववत्** (यथा गतिनिष्पत्यर्थ अश्वादयो अपेक्षन्ते । न निष्पन्नगतेर्ग्रामादि प्राप्तौ तथा) ॥

ओं शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ओं ॥२७॥

तथापि (ज्ञानस्यैव मुक्तिहेतुत्वेऽपि) ज्ञानी **शमदमादि सत्प्रवृत्त्युपेतः स्यात्**। कुतः? "आचार्याद्विद्यामवाप्यैतमात्मानमभिपश्य शान्तो भवेद्दान्तो भवे"दिति **तत्** तस्य (शमदमाद्युपेतत्वस्य) ज्ञानिनां। **विधेः** (विधानात्) **तदङ्गतया** (प्रस्तुतज्ञानाङ्गतया। ज्ञानप्रतिष्ठापकतया) **तेषां** (शमदमादीनां) **अवश्यमनुष्ठेयत्वात्**॥ **तु** शब्दः शमदमादेः संपूर्णफलार्थत्वं सूचयति॥

ओं सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ओं ॥२८॥

"यदि हवा" इति श्रुतौ **सर्वान्नानुमतिश्च** ज्ञानिनः **प्राणात्यय** विषया एव। न तु सर्वकालविषया। कुतः? **तद्दर्शनात्** (**तस्य प्राणात्यये** यथा लब्धादनस्य। **दर्शनात्**। "न वा अजीविष्यमिमानखादन्नि"त्यादि वाक्यशेषे दर्शनात्)॥

ओं अबाधाच्च ओं। ॥२९॥

ज्ञानिनां निषिद्धाकरणे **अबाधाच्च** (ज्ञाने बाधकाभावाच्च) निषिद्धं न कार्यम्॥

ओं अपि स्मर्यते ओं। ॥३०॥

सद्धर्मात्यागः "अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः। एतादृशोऽपि नाचारं श्रौतं स्मार्तं परित्यजेत्" इति **स्मर्यते अपि**। अतोऽपि न निषिद्धं ज्ञानिभिः कार्यम्॥

ओं शब्दश्चातोऽकामचारे ओं। ॥३१॥

यतः **अकामचारे** (ज्ञानिनां निषिद्धाकरणे) "एवं पश्यन्नकामचरितं चरे"दिति **शब्दश्च** अस्ति। **अतो** (निषिद्धकरणे ज्ञानस्य पूर्णफलासम्भवाच्च) अतो न निषिद्धं ज्ञानिना कार्यम्॥

ओं विहितत्वाच्चाश्रमकर्मापि ओं। ॥३२॥

"पश्यन्नपीममात्मानं कुर्यात्कर्मे"ति श्रुतौ **विहितत्वात्**। **आश्रमकर्मापि** (वर्णाश्रमोचितकर्म कार्यं) **च** (न केवलं निषिद्धाकरणेन पूर्यते)॥

ओं सहकारित्वेन च ओं । ॥३३॥

ज्ञानिना संपूर्णफलसिध्यै सत्कर्म कार्यमेव । कुतः? "यथा राज्ञ" इति श्रुतौ मोक्षफलातिशये कर्मणो ज्ञान सहकारित्वेन उक्तत्वाच ॥

५ ओं सर्वथापि तु त एवोभयलिङ्गात् ओं ॥३४॥

सर्वथापि (देशकालगुरूपसत्तिश्रवणाद्यनेकोत्साहेऽपि) त एव (प्रस्तुत-ज्ञानयोग्या एव) ज्ञानं प्राप्नुवन्ति । न त्वयोग्याः । तु (प्रत्युत विपरीत-ज्ञानमाप्नुवन्ति) कुतः? उभयलिङ्गात् (योग्यायोग्ययोर्ज्ञानप्राप्त्यप्राप्ति-रूपोभयलिङ्गदर्शनात् । इन्द्रविरोचनयोः विरिञ्चोपदेशसाम्येऽपि सम्यग्विप-रीतज्ञानप्राप्तिरूपज्ञापकात्) ॥

ओं अनभिभवञ्च दर्शयति ओं ॥३५॥

"दैवीमेवे"ति श्रुतिः न केवलं योग्यायोग्यस्वरूपं दर्शयति । किन्तु । अनभिभवश्च स्वभावातिरस्कारं च दर्शयति । अतो नायोग्यानां ज्ञान-प्राप्तिः ॥

ओं अन्तराचापि तु तद्दृष्टेः ओं ॥३६॥

अन्तरा (सम्यग्ज्ञानविपरीतज्ञानयोर्मध्ये स्थितानां नित्यसंसारिणां) अपि मिश्रस्वभावानभिभवः च (एव) कुतः? तद्दृष्टेः तु (तत् तेषां तत्र मिश्रबु-द्धित्वे एव दार्ढ्यस्य तु विशेषेण दृष्टेः दर्शनात्) ॥

ओं अपि स्मर्यते ओं ॥३७॥

"असुरा आसुरेणे"ति स्मृत्या तादृक्स्वभावत्वं तदनुगुणफलमिति द्वयं स्मर्यते अपि ॥ अतोऽपि देवदानवमानुषस्वभावानां नाभिभवः ॥

ओं विशेषानुग्रहश्च ओं ॥३८॥

देवेषु ईशस्य विशेषानुग्रहं च "शृण्वेवीर उग्रमुग्र"मिति श्रुतिः दर्श-यति । अतो देवानामेव सम्यग्ज्ञानतत्फले । नान्येषाम् ॥

ओं अतस्त्वितरज्ज्यायोलिङ्गाच्च ओं ॥३९॥

यतः अतः (देवभागात्) इतरत् तु (असुरजातमेव) ज्यायः (अति बहुलमस्ति)। अतो स्वभावानभि भवः। अन्यथा देवभागादूनता स्यात्। ज्जायस्त्वमेव कुतः? लिङ्गात् ('तस्मान्न जनतामियादि'ति जनसङ्घाप्रवेशोक्त्यन्यथानुपपत्तिरूपलिङ्गात्) "कनीयसो एव देवाज्यायसा असुरा"इति श्रुतेश्च॥

ओं तद्भूतस्य तु तद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ओं ॥४०॥

तद्भूतस्य तु (देवभूतस्यैव) तद्भावः (देवताभावः)। एवमसुरस्यैवासुरभावः। जैमिनेरपि सिद्ध एव। कुतः? नियमातद्रूपाभावेभ्यः ("नासुरा"इति नियमश्रुतेः। 'यो यद्रूप' इति अतद्रूपशब्दोक्त अन्यस्य अन्यरूपत्वाभाव श्रुतेः। अभावशब्दसूचित देवासुराणां भावाभावश्रुतेः)॥

६ ओं न चाधिकारिकमपि पतनानुमानात्तदयोगात् ओं ॥४१॥

अधिकारिकं (ब्रह्मादिदेवतापदं) नच (ज्ञानार्थिना नाकांक्ष्यं) अपि (भगवदैश्वर्यादिकं तु सुतरां न कांक्ष्यं) कुतः? तदयोगात् (तदाकाङ्क्षाया अयोगात्) तदपि कुतः? पतनानुमानात् (अयोग्येच्छात्वतः पतनस्य स्मार्तयुक्तिसिद्धत्वात्)॥

ओं उपपूर्वमपीत्येके भावशमनवत्तदुक्तम् ओं ॥४२॥

भावशमनवत् (ऋषीणां पदं यथानाकांक्ष्यं। तथा) उपपूर्वमपि (गन्धर्वपदमपि) ज्ञानार्थिभिर्नाकांक्ष्यं। अपि (किमु सुतरां देवादिपदं नकांक्ष्यमिति) इति एके शाखिनः मन्यन्ते। कुतः? यतो 'यथे' तीन्द्रद्युम्नश्रुतौ तदुक्तं (तथोक्तं)। अतः॥

ओं बहिस्तूभयथापि स्मृतेराचाराच्च ओं ॥४३॥

बहिस्तु (देवर्षिगन्धर्वपदेभ्यो बहिर्भूतज्ञानभक्त्यादिष्वस्ति विशेषः) स कः? उभयथापि (आकांक्षायामनाकांक्षायामपि न पतनं) कुतः?

"देवर्षी"ति स्मृतेः । आचाराच्च ("नानात्वमि"ति शुभाचारविधायक शब्दाच्च) ॥

७ ओं स्वामिनः फलश्रुतेरित्यात्रेयः ओं ॥४४॥

स्वामिनः स्वामिनां (इन्द्रियादिप्रेरकत्वेन ज्ञानस्वामित्वात् इन्द्रियदेवानामेव) ज्ञानफलं भवति । न प्रजानां । कुतः ? **फलश्रुतेः** "स्वामी हि फलमश्नुतेनाऽस्वामी"ति **स्वामिनः** फलश्रवणादित्यात्रेयो मन्यते ॥

ओं आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ओं ॥४५॥

हि यस्मात् **तस्मै** प्रजार्थं देवैर्ज्ञानादि **परिक्रियते** (संपाद्यते) अतः । **आर्त्विज्य** मिव [ऋत्विजां यज्ञफलमिव] प्रजानामप्यल्पज्ञानफलमस्ति इति **औडुलोमिः** मन्यते ॥

ओं सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो-विध्यादिवत् ओं ॥४६॥

तद्वतो (प्रजावतो राज्ञः । शिष्यवतो गुरोश्च) **विध्यादिवत्** (विधानफलयोरिव) यथा प्रजानां शिष्यानां पालनव्याख्यानयोः राजगुरुसहकारित्वेन विधानं फलं च । तयोरेव मुख्यतया स्वविहितज्ञानदाने । प्रजानां **सहकार्यन्तराविधिः** (देवैरनुग्राह्यरूपविशेषसहकार्यन्तरत्वेन करणं) **पक्षेण** (पक्षत्वेन) **तृतीयं** (आत्रेयौडुलोमिपक्षापेक्षया तृतीयं) ॥ अयमेव बादरायणीयः पक्षः ॥

८ ओं कृत्स्नभावात्तु गृहिणोपसंहारः ओं ॥४७॥

"कुटुंबी शुचौ देश" इत्यादिना गृहिणां मोक्षमुक्त्वा । 'नच पुनरावर्तत' इति **गृहिणोपसंहारस्तु** देवानां । कुतः ? **कृत्स्नभावात्** कृत्स्नानां गृहधर्माणां सत्वात् तत्परो न तु मनुष्यगृहस्थपरः । अतः श्रुत्यविरोधाच्च यतेरेव सर्वाश्रमेषूत्तममत्वम् ॥ गृहिभ्यो यतीनां तेभ्योऽपि देवानामुत्तमत्वमित्याशयः ॥

ओं मौनवदितरेषामप्युपदेशात् ओं ॥४८॥

मुनेर्भावं मौनं यतित्वं । **मौनवत्** [यतित्वस्येव] **इतरेषामपि** [इतर-आश्रमधर्माणामपि] "देवा एव ब्रह्मचारिण" इत्यादि श्रुतौ **उपदेशात्**। यदा आश्रमद्वयकर्मित्वेनैव यतिनो देवानामाधिक्यं । किमु तदा सर्वाश्रमकर्मित्वेनेति ॥

९ ओं अनाविष्कुर्वन्नन्वयात् ओं ॥४९॥

अनाविष्कुर्वन् सभाचत्वरादिषु आविष्कारमकुर्वन् गुरुः शिष्येभ्यो (परोक्षज्ञानस्य) उपदेशं कुर्यात । कुतः ? **अन्वयात्** (अन्यथा अयोग्यानामपि स्वीकारप्राप्तिरूपयुक्तेः) ॥

१० ओं ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनात् ओं ॥५०॥

अप्रस्तुतप्रतिबन्धे [प्रारब्धप्रतिबन्धाभावे] ज्ञानं **ऐहिकं** [इह जन्मन्येव] भवति । न चेत् जन्मान्तरे भवति । कुतः ? "श्रुत्वात्मानं मतिपूर्वं ह्युपास्येहैव दृष्टि"मिति श्रुतौ **तद्दर्शनात्** ॥

११ ओं एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ओं ॥५१॥

एवं (यथा ज्ञाने अनियमः तथा) **मुक्तिफलानियमः** (मोक्षाख्य फलेऽपि ज्ञानिनः तच्छरीरपातानन्तरमेव मोक्ष इति नियमो नास्ति) किन्तु असतिप्रारब्धप्रतिबन्धे तद्देहानन्तरमेव । न च देहान्तरावसाने मोक्षो भवति । कुत एवं ? ज्ञानानन्तरं मुक्त्यभावे कदापि नेत्येव कुतो न कल्प्यत इत्यत उक्तम् । **तदवस्थावधृतेः** ("ब्रह्मसंस्थ" इति श्रुतेः तस्मिन् [ब्रह्मणि] अवस्थितस्य । तज्ज्ञानिन इति यावत् । अवधृतेः । अमृतत्वमेत्येवेति मोक्षफलावधारणात् । अतः प्रतिबन्धकल्पना) "अध्यायान्ते द्विरुक्तिः स्यात् पूर्वोक्तस्यावधारणात्" ॥

॥ इति तृतीयाध्यायस्य चतुर्थः पादः ॥

॥ इति तृतीयाध्यायः संपूर्णः ॥



॥ अथ चतुर्थाध्यायस्य प्रथमः पादः ॥

१ ओं आवृत्तिरसकृदुपदेशात् ओं ॥ १ ॥

ज्ञानार्थं श्रवणादेः आवृत्तिः कार्या । कुतः ? "आत्मा तत्वमसी"त्युद्दालकेन श्वेतकेतुं प्रति असकृत् [अनेकवारं] उपदेशात् [तत्वोपदेशात्]।

ओं लिंगाच्च ओं ॥ २ ॥

"स तपो तप्यत । पुनरेव वरुणं पितरमुपससारे"त्यादिना श्रुताद्भृगोः श्रवणादेरावर्तनरूप लिङ्गाच्च श्रवणादीनामावृत्तिः कार्या ॥

२ ओं आत्मेति तूपगच्छंति ग्राहयन्ति च ओं ॥ ३ ॥

आत्मेति [आत्मा विष्णुः आत्मा मम स्वामीत्येवं] उपगच्छन्ति [संतः उपासते । जानन्ति] ग्राहयन्ति च [शिष्येभ्यो उपदिशन्ति च] यतोऽतो विष्णुर्मे स्वामीति सदोपास्तिः सर्वथा कार्या ॥

३ ओं न प्रतीके न हि सः ओं ॥ ४ ॥

प्रतीके ['नामब्रह्मेत्युपासीते'त्यादौ श्रुतनामादौ प्रतीके] आत्मेत्युपास्तिः न कार्या । [नामादिकं ब्रह्मेति नोपास्यं] कुतः ? नहि सः । हिं (यस्मात्) सः (प्रस्तुतो विष्णुः) प्रतीकं न भवति । अतस्तयोरैक्याभावान्न तथोपास्तिः कार्या । कथं तर्हि कार्येत्यतोऽपि । प्रतीके (प्रतिमात्मके नामादौ) आत्मास्तीत्युपास्तिः कार्या ॥

४ ओं ब्रह्मदृष्टिरुत्कर्षात् ओं ॥ ५ ॥

ब्रह्मणि (परमेश्वरे) ब्रह्मदृष्टिः (ब्रह्मत्वोपासनं । पूर्णत्वोपास्तिः) सर्वथा कार्या । कुतः ? । उत्कर्षात् (सर्वगुणपूर्णत्वरूपोत्कर्षस्य ब्रह्मपदप्रवृत्तिनिमित्तत्वात् तथोपास्तेरेव प्रीतिहेतुत्वात्) यद्वा । तथोपास्तेरुपास्त्यन्तरादुत्कृष्टत्वात् ॥ सर्वगुणपूर्णत्वरूप ब्रह्मत्वस्योत्कृष्टत्वरूपतया तथोपास्तेरन्योपासनादुत्कर्षात् ॥

५ ओं आदित्यादिमतयश्चांग उपपत्तेः ओं ॥६॥

अङ्गे (प्रस्तुतब्रह्माङ्गे) तत्र स्थितत्वेन । **आदित्यादिमतयः** (आदित्याद्युपासनाश्च । स्वस्याश्रयाङ्गत्वेनोपासना इति यावत्) आदित्यादिदेवैः सदा कार्या एव । कुतः ? **उपपत्तेः** [तेषां तत्प्रवेशापेक्षितत्वेन] तथोपासनस्य युक्तत्वात् ॥

६ ओं आसीनः संभवात् ओं ॥७॥

जिज्ञासुः । सर्वदोपासनं कुर्वन्नपि **आसीनः** [आसने उपविशन्नेव] विशेषतः कुर्यात् । कुतः ? उपासनस्यैव ज्ञानसाधनत्वेऽपि तस्याः तदा विक्षेपाल्पत्वेन **संभवात्** ॥

ओं ध्यानाच्च ओं ॥८॥

आसीनेन क्रियमाणस्य ध्यानाच्च [ध्यानरूपत्वात्] आसनसदोपासनयोर्द्वयोरविरोधः । स्मरणध्यानभेदेन उपासनस्य द्वैविध्यान्नित्यं कार्यं स्मरणस्य आसनानपेक्षत्वेऽपि ध्याने तदावश्यकम् । अन्यथा चित्तविक्षेपादिति भावः ॥

ओं अचलत्वं चापेक्ष्य ओं ॥९॥

न केवलं प्रत्याहारादिना । किन्तु शरीरस्य **अचलत्वञ्च अपेक्ष्य** मनोविक्षेपाभावो भवति अतः आसीन एव ध्यायीत ॥

ओं स्मरन्ति च ओं ॥१०॥

कृष्णादयः उक्तमर्थं "उपविश्यासने" "समङ्कायशिरोग्रीव"मित्यादिना **स्मरन्ति च** ॥

ओं यत्रैकाग्रता तत्राविशेषात् ओं ॥११॥

यत्र देशकालादौ ध्यानस्य **एकाग्रता** स्या **त्तत्र**ध्यानं कार्यम् । न तु देशविशेषानियतिः । कुतः ? **अविशेषात्** (देशकालादिना ध्यानज्ञानयोर्विशेषाभावात्) ॥

७ ओं आप्रायणात्तत्रापि हि दृष्टम् ओं ॥ १२ ॥

आप्रायणात् (नारायणं प्रति प्रयाणरूपमोक्षपर्यन्तं) ध्यानमवश्यं कार्यम्। कुतः? हि यस्मात् दृष्टं "स यो हवै तद्भगवन्मनुष्येषु प्रायणांतमोङ्कारमभिध्यायीते"ति श्रुतिरस्ति। अतः। कैमुत्येनाप्याह। तत्रापि (मुक्तावपि) ध्यानं कुर्वते। किमु ततः प्राक्। तदेव कुतः? दृष्टं हि यतो "मुक्ता अपि ह्येवमुपासत" इति श्रुतिरस्ति। अतः॥

८ ओं तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ओं ॥ १३ ॥

तदधिगमे (ब्रह्मदर्शनेसति) उत्तरपूर्वाघयोरश्लेषविनाशौ (उत्तराघस्याश्लेषः पूर्वाघस्य विनाशो भवति) कुतः? तद्व्यपदेशात् ("तद्यथा पुष्करपलाश" इति श्रुतौ अश्लेषस्य। "तद्यथैषीकतूल"मिति श्रुतौ नाशस्य च व्यपदेशात्)।

ओं इतरस्याप्येवमसंश्लेषः पाते तु ओं ॥ १४ ॥

इतरस्य (प्रस्तुतज्ञानीतरस्य) ईशद्वेषिणः। पातेतु (अनुत्थानपाते आसन्ने। मिथ्याज्ञाने पूर्णेसति) तमसि तादृशपातार्थमेव। इतरस्य (प्रस्तुत अघादितरस्य) पुण्यस्य अपि एवं (ज्ञानिपापस्येव) उत्तरपूर्वयोः असंश्लेषः (अश्लेष) विनाशौ भवतः॥

ओं अनारब्धकार्ये एव तु पूर्वे तदवधेः ओं ॥ १५ ॥

अनारब्धकार्ये (भोक्तुमनुपक्रान्ते सुखदुःखरूपे कार्ये ययोस्ते तादृशे) एव। पूर्वे (पूर्वोक्तपुण्यपापे) नश्यतः। न तु प्रारब्धकार्ये। ज्ञानानन्तरं प्रारब्धसत्वं कुतः? तदवधेः तस्य (मोक्षस्य) तदवधेः (प्रारब्धकर्मावसानावधिकत्वस्य) 'तस्य तावदेव चिर'मित्यादौ श्रवणात्। तु च ('यदनारब्धपापं स्या'दित्यादि स्मृतेश्च)॥

ओं अग्निहोत्रादितु तत्कार्यायैव तद्दर्शनात् ओं ॥१६॥

तु (ज्ञानिनो न द्वेषिणः) अग्निहोत्रादि अकाम्यकर्म तत्कार्यायैव (ज्ञानस्य कार्याय ज्ञानकार्यमोक्षातिशयानुभवायैव च) भवति । न तु नाशाश्लेषावाप्नोति । नापि बन्धकम् । ज्ञानात्पूर्वं कृतं ज्ञानाय पाश्चात्यंत्वतिशयाय भवति । कुतः ? तद्दर्शनात् ('य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयत' इति श्रुतौ उक्तार्थस्य दर्शनात् ॥

ओं अतोऽन्यदपीत्येकेषामुभयोः ओं ॥१७॥

अतः (प्रस्तुत अकाम्यात्) अन्यत् (काम्यं पूर्वोत्तरपुण्यञ्च) अप्रारब्धमनिष्टं च । नाशाश्लेषावाप्नोति । अपि (न केवलमघं) कुतः ? इति एवं उभयोः (पूर्वोत्तरपुण्यपापयो) स्त्यागेन एकेषां शाखिनां पाठोऽस्ति "तस्य पुत्रादायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या"मिति । अतः ॥

ओं यदेव विद्ययेति हि ओं ॥१८॥

यदेव विद्ययेति "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेववीर्यवत्तरं भवति" इति श्रुतिः हि (यस्मादस्ति) अतो अकाम्यं ज्ञानिकर्ममोक्षोपयोगीति युक्तम् ॥ [अज्ञानिकृतकर्मणो नाशशिरस्काल्पफलत्वेऽपि ज्ञानोत्तरकालीन ब्रह्मदर्शिकृतमल्पमपि पुण्यं महत्तममनन्तञ्च भवति] ॥

ओं भोगेन त्वितरे क्षपयित्वाथ सम्पत्स्यते ओं ॥१९॥

इतरे (प्रस्तुत अनारब्धादन्ये) प्रारब्धपुण्यपापे भोगेन क्षपयित्वाथ (प्रारब्धपुण्यपाप क्षपणादन्वेव) न तु ज्ञानोत्पत्त्यनन्तरमिव विलंबः) संपत्स्यते (ब्रह्म वा तमो वा प्राप्नोति) । तु ज्ञानिनो प्रारब्धभोगे "उपमर्दञ्चे"त्युक्त विशेषसूचकः) ॥

॥ इति चतुर्थाध्यायस्य प्रथमः पादः ॥

॥ अथ चतुर्थाध्यायस्य द्वितीयः पादः ॥

ओं वाङ्मनसि दर्शनाच्छब्दाच्च ओं ॥१॥

वाक् (वागभिमानिन्युमापदगृहीता वारुणी सौपर्णी च) मनसि मनोभिमानि रुद्रशब्दितशेषे गरुडे च। विलीयते । कुतः ? दर्शनात् (वाचो मनोवशत्वस्य प्रत्यक्षत एव दर्शनात्) मनसा संकल्पितस्यैव वाचा व्यवहरणात्। "तस्य यावन्नवाङ्मनसि संपद्यत" इति शब्दाच्च ॥

ओं अत एव च सर्वाण्यनु ओं ॥२॥

सर्वाणि च दैवतानि अनु (स्वानियम्यनियामकानुसारेण) लीयन्ते । कुतः ? अत एव ('अग्नौ सर्वे देवा विलीयन्त' इत्यादि शब्दादेव) ॥

२ ओं तन्मनः प्राण उत्तरात् ओं ॥३॥

तत् (पूर्वोक्त) मनः (मनोभिमानी शेषः सुपर्णश्च) प्राणे (वाणीद्वारा चतुर्मुखे) लीयते। कुतः ? उत्तरात् ('मनः प्राण' इत्युत्तरवाक्यात्) ॥

३ ओं सोऽध्यक्षे तदुपगमादिभ्यः ओं ॥४॥

सः (प्राणो) हिरण्यगर्भः अध्यक्षे (परमात्मनि) लीयते । कुतः ? तदुपगमादिभ्यः ('प्राणः परमुपगच्छती'त्यादि अध्यक्षप्राप्ति तदनुप्राणन तत्प्रवेशादिबोधक श्रुतिस्मृतिभ्यः) ॥

४ ओं भूतेषु तच्छ्रुतेः ओं ॥५॥

प्रागुक्तेभ्यो अन्ये देवाः पंचसु भूतेषु (भूताभिमानिषु) न त्वेकास्मिन्नग्नौ । लीयन्ते कुतः ? तच्छ्रुतेः [तस्य (भूतेषु देवानां लयस्य) "भूतेषु देवा विलीयन्त"इति श्रवणात्]॥

५ ओं नैकस्मिन् दर्शयतो हि ओं ॥६॥

एकस्मिन् अग्नावेव भूते देवा विलीयन्त इति न भवति। कुतः ? हि (यस्मात्) 'पृथिव्यामृभवो विलीयन्ते वरुण अश्विनावग्नावग्नय' इति "ऋभवः

पृथिव्या"मिति च श्रुती प्रत्येकं भूतेषु देवतालयं दर्शयतः । अतः ॥ 'अग्नौ देवा विलीयन्त' इति श्रुतिस्तु उदाहृतश्रुतावन्नय इति निर्दिष्टसर्वाग्निपुत्रमात्रपरः ॥

६ ओं समनाचासृत्युपक्रमादमृतत्वञ्चानुपोष्य ओं॥७॥

न च श्रीरीशे लीयते। कुतः? अनुपोष्य च (अनुपास्यैव) स्वत एव अमृतत्वं (नित्यमुक्तत्वं) अस्याः । यतोऽतः । तदेव कुतः? असृत्युपक्रमात् (कदापि संसारोपक्रमणाभावात्) तदपि कुतः? यतः समना (देशकालाभ्यां व्याप्त्या समो ना परमपुरुषो विष्णुर्यस्याः सा समना) तस्मात्।

ओं तदपीतेः संसारव्यपदेशात् ओं ॥८॥

"विलीनो हि प्रकृतौ संसारमेति विलीनः परमे ह्यमृतत्वमेति" इति श्रुतौ । तदपीतेः (प्रकृतौ लयस्य) संसारव्यपदेशात् । ईशलयस्य मुक्तिव्यपदेशात् न प्रकृतिपुरुषयोः सर्वसाम्यम् ॥

ओं सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ओं ॥९॥

प्रकृतेरपि ब्रह्म सूक्ष्मं । प्रमाणतश्च (ज्ञानानन्दादिगुणपरिमाणतश्च) अधिकम् । कुतः? तथोपलब्धेः "सर्वतः प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वरः"इत्यादिश्रुतौ तथा दर्शनात् ॥ अतोऽपि न सर्वसाम्यम् ॥

ओं नोपमर्देनातः ओं ॥१०॥

अतः प्रकृतिपुरुषयोः साम्यतदभावयोः एवं साधितत्वात् । स्वातन्त्र्यादीशगुणसाधारण्यस्य अनुपमर्देन (अबाधेन) प्रकृतेः परमात्मना नित्यमुक्तत्वादिनैव साम्यम् ॥

ओं अस्यैव चोपपत्तेरूष्मा ओं ॥११॥

अत्र ऊष्मशब्देन घ्राणनाद्यविषयत्वाद्यनुकूलसामर्थ्यमुच्यते ।

ऊष्मा ("द्विधा हीदमवदृश्यते ऊष्मावदनूष्मावच्च । तत्रोष्मावक्षरं ब्रह्मे"त्यादिना ईशस्य ऊष्मावत्वं देव्या ऊष्मावत्वमनूष्मावत्वञ्च वदन्ती श्रुतिर्देवदेव्योः) अस्यैव (किंचित्साम्यस्यैव) उपपत्तेः (अर्थे भवति । तस्योपपादिका भवति) यतोऽतश्च किंचित्साम्यं तयोः ॥

ओं प्रतिषेधादिति चेन्न शारीरात् ओं ॥ १२ ॥

"सर्वे ह्येतेऽणवो जायन्ते"त्यादि श्रुतौ ईशादन्येषु नित्यसर्वगतत्वाद्यभावस्य । ईशे तद्भावस्य चोक्त्या । ईशस्य देशकालव्याप्त्यादिनापि साम्यस्य **प्रतिषेधात्** देवदेव्योर्देशादिव्याप्त्यादिनापि न साम्यं इति चेन्न । कुतः ? **शारीरात्** (जीवात्साम्यस्यैवेशस्य श्रुतौ प्रतिषेधात्) प्रकृतेस्तत्प्रतिषेधाभावात् ॥

ओं स्पष्टो ह्येकेषाम् ओं ॥ १३ ॥

हि यस्मात् **एकेषां** (माध्यंदिनानां) 'अथासमा ब्रह्मेंद्रो रुद्र' इति श्रुतौ जीवानामेवासमत्वोक्ति पूर्वकं प्रकृतेः समासमत्ववादः **स्पष्टो**ऽस्ति । अतः । जीवानामेव ईशसाम्यं प्रतिषिध्यते ॥

ओं स्मर्यते च ओं ॥ १४ ॥

"ब्रह्माद्यास्त्वसमाः प्रोक्ता प्रकृतिश्च समासमे"ति **स्मर्यते च** असमत्वं समासमत्वं । अतश्चैवम् ॥

७ ओं तानि परे तथा ह्याह ओं ॥ १५ ॥

तानि ('भूतेषु लीयन्त इत्युक्तसर्वदैवतानि) विरिंचद्वारा **परे** (परमात्मनि) लीयन्ते । कुतः ? **हि** (यस्मात्) 'सर्वे देवाः प्राणमाविश्य देवे मुक्ता लयं परमे यान्ती'ति श्रुतिः **तथाह** । अतः ॥

८ ओं अविभागो वचनात् ओं ॥ १६ ॥

देवादिमुक्तानां सत्यकामत्वादेः ईशेच्छातः **अविभागः** (एकविषयत्वं) तदिच्छानुसारित्वमिति यावत् । नतु विरोधः । कुतः ? "कामेन मे काम" इत्यादि **वचनात्** । अतो देवानां मुक्तौ भगवद्वशत्वं । नतु स्वातन्त्र्यम् ॥

९ ओं तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ओं ॥ १७ ॥

ज्ञानिनः उत्क्रान्तिकाले **तदोकसः** (भगवदोकसो) हृदयस्य **अग्रे** **ज्वलनं** (प्रभा) प्रादुर्भवति । **तत्प्रकाशित** (तेन प्रकाशेन प्रकाशित) नाडी **द्वारः** सन्। देहान्निर्याति । अज्ञस्तु नैवम् ॥ ज्ञानिनोऽपि प्रारब्धसत्वात् कथमयं विशेष इत्यत उक्तम् । **विद्यासामर्थ्यात्** (ईशापरोक्षशक्त्या) ज्ञानस्य स्वोदयमारभ्य फलदातृत्वात् ॥ तर्हि ज्ञानिनो आदिमृतेरेवैवं किं नस्यादित्यत उक्तम् । **तच्छेषगत्यनुस्मृति योगाच्च** (तस्या विद्यायाः शेषोऽङ्गं या हृदयमारभ्य ब्रह्मप्राप्तिपर्यन्ताया गतेः स्मृतिः तत्साहित्याच्च) न विद्यासामर्थ्यमात्रात् ॥ साच स्मृतिः स्वकर्मविराम एव भवति ।(न मृत्यन्तरे) ॥ किंच । **हार्दानुगृहीतः** (हृदयस्थ भगवदनुगृहीतः सन्) याति । कया ? **शताधिकया** (सुषुम्ना) नाड्या ॥

ओं रश्म्यनुसारी ओं ॥१८॥

नाड्यन्तराततसौररश्म्य**नुसारी** सन् ज्ञानी निर्याति । अतो नाज्ञवत्तमसैव गमनम् । नापि द्वारपदवैय्यर्थ्यं। द्वारप्रकाशस्य वैष्णवत्वादन्तःप्रकाशस्य सौरत्वात् ॥

ओं निशि नेति चेन्न संबन्धात् ओं ॥१९॥

निशि (रात्रौ) रश्म्यभावात् ज्ञानिन उत्क्रमणं **न** युक्तं **इति चेन्न** । कुतः ? **संबन्धात्** (बाह्यादित्याभावेऽपि अन्तस्थ आदित्यरश्मीनां सदा नाडीसंबन्धात्) ॥

१० ओं यावद्देहभावित्वाद्दर्शयति च ओं ॥२०॥

नाडीरश्मि सम्बन्धस्य **यावद्देहभावित्वात्** रात्रावपि ज्ञानिनः उत्क्रमणं युक्तम् । कुतः ? **दर्शयति च** (यतः 'संसृष्टा'इति श्रुतिः तथा प्रतिपादयति । अतः) ॥

ओं अतश्चायनेऽपि हि दक्षिणे ओं ॥२१॥

"दक्षिणे मरणाद्याति स्वर्गं ब्रह्मोत्तरायण"इति स्मृतिसत्वेऽपि **दक्षिणे** **अयनेऽपि** ज्ञानिन उत्क्रान्तिर्युक्ता। कुतः ? **अतः** सौररश्मिसहस्रस्य ना-

डीसंबन्धत्वात् ॥ स्मृतौ दक्षिणोत्तरायणशब्देन देहव्याप्तसौररश्मीनामेवाभिधानम् । न तु कालस्य इति भावः ॥

ओं योगिनः प्रति स्मर्यते स्मार्ते चैते ओं ॥ २२ ॥

एते ब्रह्मचन्द्रगती योगिनः ज्ञानकर्मयोगिनः प्रति । स्मर्येते "अग्निर्ज्योति"रित्यादिस्मृत्योरुच्येते (ज्ञानादिसाध्यतया स्मर्येते) न तु कालादिकृते । स्मार्ते च (स्मरणनिमित्ते च । स्वानुस्मृतिसाध्ये च) "गती"त्यादिना स्मर्येते । अतो ब्रह्मप्राप्तौ गत्यनुस्मरणादेरवश्यकत्वम् ॥

॥ इति चतुर्थाध्यायस्य द्वितीयः पादः ॥

॥ अथ चतुर्थाध्यायस्य तृतीयः पादः ॥

१ ओं अर्चिरादिना तत्प्रथितेः ओं ॥ १ ॥

ब्रह्म गच्छन् ज्ञानी "तेऽर्चिषमभिसंविशन्त्यर्चिषोऽह"रित्युक्त्या अर्चिरादिना पथा गच्छति । न तु 'स वायुमागच्छती'त्युक्त वाय्वादिना । कुतः ? तत्प्रथितेः (तस्य उक्तार्थस्य 'तेऽर्चिषमेवाभिसंयन्ती'ति श्रुतौ 'द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिता'मिति स्मृतौ च प्रसिद्धेः) ॥

ओं वायुशब्दादविशेषविशेषाभ्याम् ओं ॥ २ ॥

अविशेषविशेषाभ्यां (' यदा हवै पुरुषोऽस्मात्प्रैति स वायुमागच्छती' ति सामान्यतो वायोः प्रथमप्राप्यत्वोक्तेस्तस्याश्च पूर्वोक्तविशेषवचनबाधेन अर्चिषोऽनंतरप्राप्यत्वार्थत्वस्य न्याय्यत्वात् । 'स इतो गतो द्वितीयां गतिं वायुमागच्छती'ति विशेषोक्त्या च) वायुशब्दात् (वायोः प्राप्यत्वश्रुतेः) उभयपर्यालोचनया वायोर्द्वितीयप्राप्यत्वमेव सिध्यति ॥

२ ओं तटितोऽधिवरुणः संबन्धात् ओं ॥ ३ ॥

तटितः (तटिल्लोकात्) अधि (उपरि । तटिल्लोकप्राप्त्यनन्तरं) वरुणः (प्राप्यो । न तु 'संवत्सराद्वरुणलोक'मिति श्रुत्या तदनन्तरमेव) कुतः? संबन्धात् ('तटिता ह्यूह्यते वरुणलोक' इति तस्य तटितोऽधिसंबन्धश्रवणात्)।

३ ओं आतिवाहिकस्तल्लिंगात् ओं ॥ ४ ॥

योऽयं द्वितीयप्राप्यतया प्रागुक्तो वायुः असौ आतिवाहिक (एव । तदाख्यो मुख्यपुत्रः कश्चिन्न मुख्यवायुः) कुतः ? तल्लिंगात् (पूर्वप्राप्यत्वाल्लिंगात्) तद्धि अमुख्यस्यैव भवेन्न मुख्यस्य ॥

४ ओं उभयव्यामोहात्तत्सिद्धेः ओं ॥ ५ ॥

उभयस्मिन् (वायुशब्दे आतिवाहिको मुख्यो वेति) व्यामोहे (सन्देहेऽपि) तत्सिद्धेः (पूर्वोक्त आतिवाहिकः पश्चादुक्तो मुख्य इत्यस्यार्थस्य सिद्धेः) पश्चात्तनस्य दिवस्पतित्वलिङ्गादिति भावः ॥

५ ओं वैद्युतेनैव ततस्तच्छ्रुतेः ओं ॥ ६ ॥

मार्गे तारतम्यक्रमं विहाय प्राप्यानामुच्यमानत्वात् ततः (वायोः पश्चात् ईशादर्वाक्) अन्यप्राप्योऽस्तीति न शंक्यम् । कुतः ? वैद्युतेनैव (विद्युत्पतिना वायुनैव) "स एनान् ब्रह्म गमयती"ति तत् तस्य (ब्रह्मगमनस्य) श्रुतेः (श्रवणात्) अतः स एव अंतिमप्राप्यः ॥

६ ओं कार्यं बादरिरस्य गत्युपपत्तेः ओं ॥ ७ ॥

"स एनान् ब्रह्मे"ति श्रुतौ कार्यं ब्रह्म (चतुर्मुखाख्यमेव) वायुर्नयतीति बादरिर्मन्यते । कुतः ? अस्य गत्युपपत्तेः ('तथापि प्रकृतेर्बन्धो ब्रह्मणा सह भिद्यते' इत्युक्त्या चतुर्मुखमुक्तिपर्यन्तं बन्धस्य सन्तततत्वेन ततोऽर्वाक् चतुर्मुखस्यैव गत्युपपत्तेः) ॥

ओं विशेषितत्वाच्च ओं ॥ ८ ॥

"यदि हवावपरमभिपश्यति प्राप्नोति ब्रह्माणं चतुर्मुख"मिति श्रुतौ प्राप्यस्य ब्रह्मणः चतुर्मुखपदेन विशेषितत्वाच्च कार्यमेव ब्रह्मपदार्थः ॥

ओं सामीप्यात्तु तद्व्यपदेशः ओं ॥ ९ ॥

तद्व्यपदेशः ('ब्रह्मविदाप्नोति पर'मिति ज्ञानिनः परप्राप्तिव्यपदेशः) सामीप्यात्तु (परप्राप्तेः कालतः सामीप्यादेव हेतोः) न तु कार्यस्याप्राप्यत्वान्नवापरस्य प्रथमप्राप्यत्वात् ॥

ओं कार्यात्यये तदध्यक्षेण सहातः परम-भिधानात् ओं ॥१०॥

कार्यात्यये (कार्याणामत्यये नाशरूपे प्रलये) तदध्यक्षेण सह (कार्याणां स्वामिना चतुर्मुखेन सह) अतः (चतुर्मुखात्) परं (ब्रह्म) ज्ञानी गच्छति। कुतः ? "तेह ब्रह्माणमभिसंपद्य यदैतद्विलीयतेऽथ सह ब्रह्मणा परमभिगच्छन्ती"ति श्रुतौ तदभिधानात् ॥

ओं स्मृतेश्च ओं ॥११॥

"ब्रह्मणा सह ते सर्व"इत्यादिस्मृतेश्च चतुर्मुखेन सह ज्ञानी परं प्राप्नोतीति सिध्यति ॥

ओं परं जैमिनिर्मुख्यत्वात् ओं ॥१२॥

"स एनान् ब्रह्मे"ति श्रुतौ परं ब्रह्म वायुर्गमयति न कार्यमित्यर्थ इति जैमिनिर्मन्यते । कुतः ? ब्रह्मशब्दस्य तत्र मुख्यत्वात् ॥

ओं दर्शनाच्च ओं ॥१३॥

श्रवणादिसाधनैरपरोक्षतया परस्यैव ब्रह्मणो दर्शनाच्च (दृष्टत्वाच्च) अन्यस्य तदभावात् युक्त एवात्र मुख्यार्थस्वीकारः ॥

ओं न च कार्ये प्रतिपत्त्यभिसंधिः ओं ॥१४॥

कार्ये ब्रह्मणि प्रतिपत्तिः (कार्ये प्राप्नुवानीति) अभिसंधिश्च न (नास्ति) यतोऽतश्च परमेव प्राप्यं । न कार्यम् ॥

ओं अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ओं ॥१५॥

(प्रतीकं देहः । उपलक्षणमेतत् । तत्रैव देहादावेव ब्रह्म पश्यन्तः प्रतीकालम्बनाः । तदन्ये) अप्रतीकालम्बनाः व्याप्ततया ब्रह्म पश्यन्त इत्यर्थः । तान् परं नयति । न तु सर्वान् । अन्यानेव च कार्यमिति श्रुत्यर्थ

इति भगवान् बादरायणो मन्यते । कुतः ? उभयथा च दोषात् (परप्राप्तिपक्षे गत्यनुपपत्त्यादिदोषस्योक्तत्वात् । कार्यप्राप्तिपक्षे च ब्रह्मशब्दामुख्यार्थत्वादिदोषाणामुक्तत्वात् ।) उभयप्राप्तिपक्षे तु दोषद्वयाभावात् ॥ ननु "यत्प्राप्तुमभिवांछंति तत्प्राप्नोती"ति वचनात्तत्तदिच्छामात्रेण तत्तत्प्राप्ति संभवात् नोक्तव्यवस्थाङ्गीकार्येत्यत आह । तत्क्रतुश्च । यतः "स यथा कामो भवति तत्क्रतुर्भवती"त्यादिश्रुतिः इच्छामात्रेण तत्तत्प्राप्तिं प्रतिषिध्य तज्ज्ञानोपासनापारोक्षैरेव तत्प्राप्तिं वक्ति । अतस्तदिच्छामात्रेणैव न तत्प्राप्तिर्युज्यते ॥

ओं विशेषञ्च दर्शयति ओं ॥ १६ ॥

च (यतः) "अन्तःप्रकाशा"इति श्रुतिः केचन अप्रतीकालम्बनाः केचन प्रतीकालम्बना इति विशेषं (भेदं) दर्शयति (प्रतिपादयति) तस्माच्चोक्तं युक्तम् ॥

॥ इति चतुर्थाध्यायस्य तृतीयः पादः ॥



॥ अथ चतुर्थाध्यायस्य चतुर्थः पादः ॥

ओं संपद्याविहाय स्वेन शब्दात् ओं ॥ १ ॥

ज्ञानी परं ब्रह्म संपद्य (प्राप्य) अविहाय (परं ब्रह्मानतिक्रम्य) स्वेन (आविर्भूतरूपेण अवस्थितः सन्) भोगान् भुङ्क्ते। कुतः ? शब्दात् ("सय एवं विदि"ति श्रुतेः ॥

२ ओं मुक्तः प्रतिज्ञानात् ओं ॥ २ ॥

"स तत्र पर्येति जक्षन् क्रीडन्" इत्यत्र मुक्त उच्यते । न तु क्रियाप्रतीत्या संसारी । कुतः ? "अथ यदैनं मुक्तोऽनुप्रविशति मोदते प्रमोदत" इति श्रुत्यन्तरे मुक्तस्यैव भोग प्रतिज्ञानात् ॥

३ ओं आत्मा प्रकरणात् ओं ॥ ३ ॥

"परंज्योतिरुपसंपद्य" इति श्रुतं मुक्तप्राप्यं ज्योतिः आत्मा (परमात्मैव नतु सूर्यः) कुतः ? 'य आत्मा अपहतपाप्मे'ति परमात्म प्रकरणात् ॥

४ ओं अविभागेन दृष्टत्वात् ओं ॥ ४ ॥

अविभागेन (परमात्मभोगाविभागेन) सायुज्यभाजो भोगान् भुञ्जते। तद्भोगानेव कांश्चिद्भुञ्जते। न पार्थक्येनेति यावत्। कुतः ? दृष्टत्वात् 'यानेवाहं श्रुणोमि यान् पश्यामी'ति श्रुतौ तथा दृष्टत्वात् ॥

५ ओं ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ओं ॥ ५ ॥

मुक्तस्य स्वदेहाभावेऽपि ईशं प्रविष्टस्य ब्राह्मेण (ब्रह्मसम्बन्धिना देहेन) गृहवत् भोगोऽस्तीति जैमिनिः मन्यते। कुतः ? "ब्रह्मणा पश्यति ब्रह्मणा श्रुणोती"ति श्रुतौ तथा उपन्यासात्। आदि पदेन "आदत्ते हरिहस्तेन हरिदृष्टचैव पश्यती"त्यादि स्मृतेः। 'गच्छामि विष्णुपादाभ्यां विष्णुदृष्ट्या च दर्शनमि'त्यादि पूर्वस्मरणान्मुक्तस्यैतद्भविष्यती'ति स्मृत्युक्तयुक्तेश्च।

ओं चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ओं ॥६॥

चितिमात्रेण (चिन्मात्ररूपेण देहेन) मुक्तो भोगान् भुङ्क्ते। न चैवं देहित्वे संसारिसमानत्वं। चिन्मात्रदेहस्य तदात्मकत्वात् (मुक्तस्वरूपत्वात्) तस्याकृत्रिमत्वेन। कृत्रिमदेहस्यैव संसारिसाम्यापादकत्वं इति औडुलोमिः मन्यते ॥

ओं एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ओं ॥७॥

एवमपि (चिन्मात्रदेहेन भोगान् भुञ्जत इति एवं प्रकारेणापि) "सवा एष एतस्मान्मर्त्याद्वियुक्तश्चिन्मात्रो भवन्त्यनेनैव रूपेणाभिपश्यत्यभिश्रुणोती"ति श्रुतौ उपन्यासात्। पूर्वस्य जैमिन्युक्तदेहाभावस्यापि भावात्

(तत्रोक्तश्रुत्या सत्त्वावगमात् ।) द्वयोरपि प्रामाणिकत्वादिति यावत् । अविरोधं (जैमिन्यौडुलोमिमतयोर्मर्त्यदेहाभावभावाभ्यामुपगमेनाविरोधं) बादरायणो मन्यते ॥

६ ओं संकल्पादेव च तच्छ्रुतेः ओं ॥ ८ ॥

मुक्तानां संकल्पादेव भोगसिद्धिः । कुतः ? "संकल्पादेवास्य पितरः समुत्तिष्ठन्ती"ति तच्छ्रुतेः (तस्य श्रवणात्) च शब्दस्तु लोके भोगस्य कर्मसाध्यत्वान्मुक्तभोगस्यापि प्रयत्नापेक्षेति न वाच्यमिति शङ्काव्यावृत्त्यर्थः ॥

७ ओं अत एव चानन्याधिपतिः ओं ॥ ९ ॥

अत एव (प्रागुक्त सत्यसङ्कल्पादेव) मुक्तो अनन्याधिपतिः (स्वलक्ष-स्वोत्तमेभ्योऽन्याधिपतिहीनः) च शब्दो विपक्षव्यावृत्त्यर्थः ॥

८ ओं अभावं बादरिराह ह्येवम् ओं ॥ १० ॥

अभावं (चिन्मात्रदेहान्यप्राकृतदेहस्य अभावं) मुक्तानां बादरिः मन्यते । येन दुःखित्वादिकमाशंक्यं स्यात् । कुतः ? "अशरीरा वाव तदाभवती"ति श्रुतिः एवं आह । हि यस्मात्तस्मात् ॥

ओं भावं जैमिनिर्विकल्पाम्नानात् ओं ॥ ११ ॥

कदाचित् भोगार्थं मुक्तानां चिन्मात्रदेहान्यप्राकृतदेहस्य भावं (सत्त्वं) जैमिनिः मन्यते । कुतः ? "चितावाचितावे"ति श्रुतौ विकल्पस्य आम्नानात् ॥

ओं द्वादशाहवदुभयविधं बादरायणोऽतः ओं॥ १२॥

उभयविधं (मुक्तानां देहभावाभावाख्यं प्रागुक्तमुभयविधं) बादरायणः स्वमतं मन्यते । कुतः ? अतः (उभयोरपि प्रमाणवत्वात्) विरुद्धं कथं स्वमतमत उक्तं द्वादशाहवत् (यथा द्वादशाहाख्ययागस्य क्रतुत्वं सत्रत्वञ्च यजमानेच्छया एकानेकयजमानकत्वाभ्यामविरुद्धम् । तथा मुक्तानामिच्छया देहभावाभावौ न विरुद्धौ) ॥

ओं तन्वभावे संध्यवदुपपत्तेः ओं ॥ १३ ॥

तन्वभावे (मुक्तौ बाह्यदेहाभावे) अपि भोगस्य उपपत्तेः । कथं ? सन्ध्यवत् (स्वप्नावस्थायां देहाभिमानाभावेऽपि यथा भोगस्तथा) अनभिमानस्याभावसाम्यात् । स्वप्नार्थानां सत्यत्वोक्तेरिति भावः ॥

ओं भावे जाग्रद्वत् ओं ॥ १४ ॥

जाग्रद्वत् (यथा जाग्रद्दशायां) देहभावे भोगस्तथा मुक्तावपि देहभावे भोगो युक्तः ॥

ओं प्रदीपवदावेशस्तथा हि दर्शयति ओं ॥ १५ ॥

आवेशः (मुक्तानां शुद्धप्रकृतिमयज्योतीरूपबाह्यदेहप्रवेशः) प्रदीपवत् (प्रदीपस्य दीपिकाप्रवेश इव) यथा प्रदीपो दीपिकाविष्टः सन् तत्स्थतैलाद्येव भुङ्क्ते न कार्ष्ण्यादि । तथा मुक्तो जडदेहप्रविष्टोऽपि न दुःखं भुङ्क्ते । किन्तु सुखमेव। कुतः ? "तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवती" ति श्रुतिः । तथा (मुक्तौ दुःखाभावं) दर्शयति । हि यतो अतः ॥

ओं स्वाप्यय संपत्योरन्यतरापेक्षमाविष्कृतं हि ओं ॥ १६ ॥

'तीर्णोही'ति वाक्यं स्वाप्ययसंपत्योरन्यतरापेक्षं । (सुप्तिमुक्त्युभयपरं) न स्वर्गविषयम् । कुत ? हि यस्मात् आविष्कृतं (तदुभयविषयत्वमस्य वाक्यस्य "अत्र हि पिताऽपिताभवती"त्यादिना विस्पष्टं) अतः ॥

९ ओं जगद्व्यापारवर्जम् ओं ॥ १७ ॥

सृष्ट्यादि जगद्व्यापारवर्जं कामं मुक्त आप्नोति । न तु "सर्वान् कामानाप्त्वा अमृत"इति श्रुत्या सृष्ट्यादि कामानपि ॥

ओं प्रकरणादसन्निहितत्वाच्च ओं ॥ १८ ॥

"शरीरभेदादूर्ध्वमुत्क्रम्ये"ति जीव प्रकरणात् । जीवानां जगज्जननादिसामर्थ्ये असन्निहितत्वात् (तद्विदूरत्वात् । तद्धीनत्वादिति यावत्) 'सर्वान् कामानि'ति श्रुतेः सङ्कोचो युक्तः ॥

ओं प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ओं ॥१९॥

"ता यो वेद सवेदब्रह्म सर्वेस्मै देवा बलिमावहन्ती"ति प्रत्यक्षं (स्पष्टं) मुक्तस्य सर्वदेवपूज्यत्वोपदेशात् मुक्तानां जगदैश्वर्यमप्यस्ति इति चेत् न कुतः ? आधिकारिकमण्डलस्थोक्तेः (स्वयोग्यपदवीं प्राप्तदेवानां मण्डले नियामकतया स्थितस्य) मुक्तविरिंचस्यैव । तत्रोक्तेः । नाऽशेषमुक्तानां जगदैश्वर्यम् ॥

ओं विकारावर्तिच तथा हि दर्शयति ओं ॥२०॥

विकारं संसारं आवर्तयतीति विकारावर्ति तद्विषयं व्यापरणम् । च (मुक्तानां नास्ति) कुतः ? 'इमं मानवमावर्तन्नावर्तत' इति श्रुतिः तथा दर्शयति । हि यतोऽतः ॥

१० ओं स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने ओं॥२१॥

"ब्रह्मणि संपन्नो न जायते न म्रियते नहीयते न वर्धत"इति श्रुतिः। स्थितिं (मुक्तानामेकप्रकारेणावस्थानं) आह । महतां प्रत्यक्षं । मुक्तो न वृध्यादिमान् तद्धेतुशून्यत्वात् इति अनुमानं च । एवं (एकप्रकारेणावस्थितिं) दर्शयतः ॥

११ ओं भोगमात्रसाम्यलिंगाच्च ओं ॥२२॥

मुक्तानां भोगविशेषसत्वात् कथं वृध्यादौ कारणाभाव इत्यत आह । भोगमात्रस्य साम्ये (मुक्तस्यानन्दवृध्याद्यकारणत्वे) लिङ्गाच्च (लिङ्गसद्भावाच्च) 'एतमानन्दमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्धते यथा कामञ्चरति यथा कामं पिबते यथा कामं रमते यथा काममुपरमत' इति श्रुतौ मुक्तस्य वृद्ध्याद्यभावोक्ति पूर्वं भोगभावाभावोक्तेः भोगविशेषो नानन्दवृध्यादिहेतुरित्यर्थेलिङ्गसत्वात् ॥

१२ ओं अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ओं ॥२३॥

मुक्तानां अनावृत्तिः न तु सर्वकालस्यापि समाप्त्या स्वर्गिवत्पुनरावृत्तिः । कुतः ? "न च पुनरावर्तत" इति शब्दात् (श्रुतेः) । समस्तशास्त्रार्थावधारणार्थो सूत्रस्यैवात्र द्विरुक्तिः ॥ इति चतुर्थाध्यायस्य चतुर्थः पादः ॥

॥ चतुर्थाध्यायः समाप्तः ॥ सम्पूर्णश्चायं ग्रंथः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

इति श्रीब्रह्मसूत्राणां पदवाक्यसमन्वयाः ।
दर्शिता रामचन्द्रेण प्रीत्यै माधवमध्वयोः ॥ १ ॥
श्रीमध्वागम पीयूषं गलितं यन्मुखाम्बुजात् ।
पीतं तान् सगशाचार्यान् प्रणमामि निरन्तरम् ॥ २ ॥
वन्दिताशेष सद्वैष्णवाचार्यवर्यं नन्दतीर्थाख्योरुसन्नामिनं नन्दिनम् ।
तं दयालुं नौम्यहं रामचन्द्रः सदा इंदिराकान्तमानन्ददंचाति भक्त्या ॥

सद्वैष्णवैः कर्मावसाने पठनीयश्रीमद्वायुदेवकृत भगवत्स्तोत्रम् ॥

श्रीमद्गरुडपुराणब्रह्मकाण्डे षष्ठे अध्याये—वायुरुवाच—

एते हि देवास्तवभृत्यभूताः पादारविन्दं परमं सुदुर्लभम् ।
चतुर्विधान् पुरुषार्थान् रमेश संप्रार्थयन्त्येव सदापि दृष्ट्वा ॥ १ ॥
यतो हरेस्तव मायैव तत्र सुकारणं किंचिदन्यन्नचास्ति ।
अतो नाहं प्रवृणोमि भूमन् भवत्पदाम्भोज निषेवणोत्सुकः ॥ २ ॥
लोकस्य कृष्णाद्विमुखस्य कर्मणा अपुण्यशीलस्य सुदुःखितस्य ।
अनुग्रहार्थं च तवावतारो नान्यच्च किंचित्पुरुषस्तवेश ॥ ३ ॥
गोभूसुराणां च महीरुहाणां तथा सुराणां प्रवरावतारैः ।
क्षेमाय कर्माणि च वासुदेव क्रीडन्विधत्ते न च किंचिदन्यत् ॥ ४ ॥
मनो न तृप्यत्यतिशङ्कितानि सुश्लोकमौलेश्चरितामृतानि ।
अच्छिन्नभक्तस्य हि मे मुदं सदा भक्तिं परां देहि पदारविन्दे ॥ ५ ॥

सदा तदेवास्ति न किंचिदस्ति यत्रत्वमस्ति पुरुषेषु देव ।
अहं च तत्रास्मि तव प्रसादाद्यत्रास्म्यहं तत्र भवान् महाप्रभो ॥ ६ ॥
व्याप्तिं ममेदं च शरीरमध्ये चतुर्मुखस्यैव नचस्तदन्ये ।
मदीय निद्रा तव वन्दनं प्रभो मदीययात्राचरणं प्रदक्षिणम् ॥ ७ ॥
मदीय वाग्व्याहरणस्तुतिस्तवेत्येवं विदित्वा च समर्पयामि ।
मद्दृष्टियोग्यांश्च पदार्थजातान् दृष्ट्वा हरिप्रतिमा एव देही ॥ ८ ॥
मत्वाप्यहं सर्वदा देवदेव तत्रस्थितान् हरिरूपान् भजिष्ये ।
यच्चन्दनं यच्चपुष्पं च धूपं वस्त्रं च यद्भक्ष्यभोज्यादिकं च ॥ ९ ॥
एतत्सर्वं विष्णुप्रीत्यर्थमेव ह्येतद्व्रतं सर्वदाहं करिष्ये ।
अवैष्णवान् दूषयिष्ये सदाहं सद्वैष्णवान् पालयिष्ये मुरारे ॥ १० ॥
विष्णुद्रुहाणां छेदयिष्ये च जिह्वां तच्छ्रुण्वतां पूरयिष्ये त्रपूरसान् ।
एतादृशीभक्तिममास्ति देव तव प्रसादाद्बलतोऽपि विष्णो ॥ ११ ॥
अथापि नाहं स्तवनेसमर्थो लक्ष्म्याद्यहं कोटिगुणैर्विहीनः ।
एतत् स्तोत्रं ह्यर्पयिष्ये तवैव यतः प्रीतिः ह्यक्षया मे सदास्यात् ॥१२॥
स्तोत्रं ह्येतत्पाठयन्तीह ये वै ते वैष्णवास्ते च हरिप्रियाश्च ।
कुर्वन्ति ये पठनं नित्यमेव समर्पयिष्यन्ति सदा हरौ च ॥ १३ ॥
तेषां हरिः प्रीयते केशवोऽलं हरौ प्रसन्ने किमलभ्यं इहास्ति ।
एवं स्तुत्वा बलदेवो महात्मा तूष्णीं स्थितः प्राञ्जलिरग्रतो हरेः ॥ १४॥



91
1...